॥ श्रीशिवराज्योदये महाकाव्ये ४९ तमः सर्गः ॥

जयसिंहप्रबोधनम्

अथाधिकारिभिः सार्धं जयसिंहो महाबली ।
विजयाकाङ्क्षिभिर्वीरैर्मन्त्रयामास काङ्क्षितम् ॥१॥
स उवाच महावीरानमूनात्मवशंवदान् ।
अदूरवर्तिनीं कार्यसिद्धिमुद्दिश्य भाविनीम् ॥२॥
ज्ञातं वो बान्धवास्तथ्यं यदयं रणकोविदः ।
नाद्यावधि पराभूतः शिवाजिर्वृकयुद्धकृत् ॥३॥
परन्त्विदानीमस्माकमपारं सैन्यसागरम् ।
न द्रष्टुमपि शक्नोति स कथं प्रविशेन्ननु ॥४॥
दूतहस्तेन पत्राणि भूयः प्रहितवानसौ ।
क्षमापत्राणि शत्रूणां व्यञ्जयन्ति पराभवम् ॥५॥
तत्रासावलिखद् धूर्तो यदहं पृथिवीपतेः ।
दासभावेन साहाय्यं सर्वथा कर्तुमुत्सहे ॥६॥
भूयः कृतापराधोऽहं बलिनो देहलीपतेः ।
तापयन्तीव कर्माणि मां निजान्येव साम्प्रतम् ॥७॥
विना निस्तारमूल्येन प्रायश्चित्तं न सिध्यति ।
दुर्गास्तन्मे यथाकामं स्वीक्रियन्तां निजेप्सिताः ॥८॥
विजापुरनरेशोऽयमादिलाख्यो भवद्रिपुः ।
तद्राज्यं चेद् विजेतव्यं साहाय्यं दातुमुत्सहे ॥९॥
इत्थं तस्य पराभूतिव्यञ्जकानि पुनः पुनः ।
प्राप्य पत्राणि न त्यक्तो मया खल्वात्मनिश्चयः ॥१०॥
भूयो भूयो मया चासौ शिवः कौटिल्यकोविदः ।
तं तमेवात्मसन्देशं संप्रेष्य प्रतितर्जितः ॥११॥
आकाशमण्डले तारागणा यावन्त उज्ज्वलाः ।
सैनिकाः प्रस्फुरद्वीर्यास्तावन्तो देहलीपतेः ॥१२॥
शिलोच्चयमयं सर्वं महाराष्ट्रमिदं तव ।
तुरङ्गसादिनोऽस्माकमास्कन्दिष्यन्ति सत्वरम् ॥१३॥
सपुत्रबान्धवं राजन् ! यदि जीवितुमिच्छसि ।
सेवेव पृथिवीन्द्रस्य शरणं तव निर्भयम् ॥१४॥
विजापुरनरेशेण ह्यस्माकं रिपुणा सह ।
कर्तुं स यतते सन्धिमिति जाने चरोदितैः ॥१५॥

Scanned by CamScanner

यद्यरात्योः कथञ्चन ।
सम्पद्येत तयोरैक्यं बलिनामपि चास्माकं विग्रहः स्यात् सुदुष्करः ॥१६॥
सर्वथा दुर्घटं मन्ये तयोरैक्यं विरोधिनोः ।
कुटिलाः किन्तु नीतिज्ञा घटयन्त्येव दुर्घटम् ॥१७॥
कौटिल्यपण्डितो नूनं शिवाजिरिह भारते ।
दुर्घटं दुष्करं सर्वं येनाद्यावधि साधितम् ॥१८॥
विजापुरनरेशं तमात्मनश्चिरदौहृदम् ।
शङ्के केनाप्युपायेन कपटी स वशं नयेत् ॥१९॥
भयमेतद्धि सम्भाव्यं राजराजेश्वरं प्रति ।
निवेदितं मया पत्रैर्यथावसरमात्मनः ॥२०॥
जनश्रुतिरिहानीताऽस्मदीयैर्बहुभिश्चरैः ।
यत्सन्धिं कर्तुमुद्युक्तौ तौ परस्परवैरिणौ ॥२१॥
कालेऽस्मिन् विकटे कैश्चित् शिवराजस्य सेवकः ।
अस्मत्समीपमभ्येतु सन्ध्यर्थमिति कामये ॥२२॥
इत्युक्तवति वै तस्मिन् जयसिंहे महाबले ।
द्वाःस्थ आवेदयांचक्रे शिवदूतप्रवेशनम् ॥२३॥
जयसिंहनिदेशेन रघुनाथाभिधो द्विजः ।
प्रवेशितोऽतिवर्षिष्ठः शिवप्रतिनिधिस्तदा ॥२४॥
द्विजं पण्डितरावं तं स राजा प्रियपण्डितः ।
प्रेम्णा सभाजयामास वस्त्रालङ्कारसम्पदा ॥२५॥
असावपि द्विजस्तस्मै शिवप्रहितमुज्ज्वलम् ।
ददौ सुवर्णरत्नाढ्यमुपायनमनुत्तमम् ॥२६॥
पप्रच्छ जयसिंहस्तं कुशलं सर्वतोमुखम् ।
आभाषणे हि नीतिज्ञा वमन्ति मधु केवलम् ॥२७॥
स च पण्डितरावस्तं निबद्धकरसम्पुटः ।
शुचिस्मितस्फुरन्नेत्रः प्रोवाच नतमस्तकः ॥२८॥
सहस्रकरसद्वंशमहारत्ने भवादृशि ।
द्योतमाने महाराष्ट्रे कुतोऽकुशलकालिमा ॥२९॥
चिरमाराध्यमानोऽसौ श्रीमता यज्ञपूरुषः ।
सर्वेषां यज्ञनिष्ठानां कथं न तनुतां शिवम् ॥३०॥
हिन्दुधर्मैकनिष्ठेन भवता या उपासिताः ।
देवता अत्र वर्षेयुस्ताः कथं नहि मङ्गलम् ॥३१॥
इत्थं प्रास्ताविकं शृण्वन् वचस्तस्य स्तवात्मकम् ।
प्रतीतो नितरामन्तर्जयसिंहस्तमब्रवीत् ॥३२॥

Scanned by CamScanner

विद्वन्नलमलं स्तुत्या भवतो भावगर्भया ।
स्तुतिर्वृद्धोदिता यूनस्त्रपायै खलु कल्पते ॥३३॥
वक्तव्यमस्ति चेत् किञ्चित् हृद्गतं स्वामिनस्तव ।
तदेव श्रोतुमिच्छामि नैवेमं स्तुतिविस्तरम् ॥३४॥
समयज्ञोऽग्रजन्माऽसौ संहृत्य वच आत्मनः ।
जगाद शिवसन्दिष्टां वाचं प्रस्फुटया गिरा ॥३५॥

* * *

नमो नमस्ते जयसिंह वीर श्रीरामचन्द्रान्वयभव्यकेतो ।
तव प्रभावादतुलान्वितान्तं चकास्ति लोके रजपूतजातिः ॥३६॥
पायादपायाद् भगवान् भवन्तं न्याय्यं च धर्म्यं च दिशेच्च मार्गम् ।
देशस्य धर्मस्य तथाऽस्य हिन्दोर्जनस्य भद्राय समीरयेच्च ॥३७॥
भवानधीताखिलनीतिमार्गो देवार्चनासक्तमना विवेकी ।
कथं न जानाति परन्त्विदानीं स्वकर्मणो हन्त दुरन्तभावम् ॥
स्वसौख्यलिप्सा यदि मेऽभविष्यत् संप्रेरको हेतुरशेषकार्ये ।
न दुर्लभं तन्मम भारतेऽस्मिन् यम्लेच्छदास्यादितरे लभन्ते॥३९॥
विवेकमार्गेण धियं स्वकीयां भवान् क्षणं चेत् प्रतिनोदयेत ।
स्फुटीभवेत् तत् सकलं रहस्यं स्वातन्त्र्ययुद्धस्य हि मत्कृतस्य ॥४०
सुक्षत्रियैरग्निरवीन्दुवंश्यैः सद्धर्मसंरक्षणपुण्यशीलैः ।
अनादिकालात् प्रतिपालितेयं पुण्यास्मदीया जननीव भूमिः ॥४१॥
जगन्नियन्ता जगतीहितार्थं दुर्दान्तरक्षःप्रलयं चिकीर्षुः ।
अनेकदाऽस्या अतिपुण्यभूमेः निजेच्छयाऽविन्दत पुत्रभावम् ॥४२॥
दिव्यत्वमस्या निजजन्मभूमेः भवादृशोऽग्रे किमु वर्णयामि ।
सर्वत्र सञ्चारकृता सदा यत् साक्षात्कृतं स्याद् भवता समग्रम् ॥४३॥
यदा यदा दुर्धरशस्त्रपाता म्लेच्छारयोऽत्राक्रमणार्थमायन् ।
तदावयोरेव हि भूतपूर्वैः सम्बन्धिभिः किं न कृतः स्वहोमः ॥४४॥
कथं न जानाति भवान् हि राजस्थानोद्भवस्तत्र सुगीयमानाः ।
स्वशीलसंरक्षणमात्रहेतोः हुतात्मनो मातृजनस्य गाथाः ॥४५॥
स्थले स्थले हन्त निपातितानि श्रीरामचन्द्रस्य हि मन्दिराणि ।
श्रीरामचन्द्रान्वयजेन किं नो दृष्टानि राजन् भवताऽत्र देशे ॥४६॥
सीतापहारे रघुनायकेन कृतः प्रमाथोऽखिलराक्षसाणाम् ।
तथैव भीमेन महाबलेन कृष्णाऽपमानेऽखिलकौरवाणाम् ॥४७॥
रामस्य भीमस्य च जन्मभूमौ देशेऽस्मदीये नितरां पवित्रे ।
विज्ञायते किं न चिरस्य बन्धो म्लेच्छैः कृतो मातृजनापहारः ॥४८॥

Scanned by CamScanner

जानामि देवार्चनसक्तचित्तं राजन् भवन्तं निजधर्मनिष्ठम् ।
किं पारतन्त्र्यप्रहते हि देशे वसन्ति देवा ध्रियते च धर्मः ॥४९॥
नष्टस्वराज्यस्य जनस्य नूनं स्वदेशभक्तिः खलु देवभक्तिः ।
धर्मस्य सम्यक् परिपालनं च स्वातन्त्र्यसम्पादनयत्न एव ॥५०॥
प्रतापसिंहेन हि सिंहधाम्ना स्वत्वाभिमानैकमहाधनेन ।
प्रवर्तितं यत् खलु पुण्यकार्यं तत् पूरयावः समभावबन्धो ॥५१॥
राजर्षिभी रामयुधिष्ठिराद्यैः अध्यासितं यत् सततं पवित्रम् ।
तत् धर्मसिंहासनमस्मदीयं धर्मारिभिर्हन्त न दूषितं किम् ?॥५२॥
समग्रसामर्थ्यविशेषशाली भवान् भवेच्चेत् खलु देहलीन्द्रः ।
स्वबाहुवीर्यार्जितमेतदल्पं करोमि राज्यं प्रथमोपहारम् ॥५३॥
गुरोः समर्थस्य तथा च मातुः पुण्योपदेशैरनिशं निपीतैः ।
राज्योपभोगेषु विगर्हितेषु न लेशमात्रोऽपि ममाभिलाषः ॥५४॥
परन्तु सद्धर्मविरुद्धभूतैः स्वराष्ट्रबाह्यैरतिपापवृत्तैः ।
अधिष्ठितं धर्मधुरन्धराणां सिंहासनं मां ह्वयतीव दूनम् ॥५५॥
वीर्यार्जितं राज्यमिदं स्वकीयं समर्पयेऽहं भवते सुखेन ।
आरोढुमाकाङ्क्षति चेद् भवांस्तत् सनातनं भारतराज्यपीठम् ॥५६
अहिन्दुभूतोऽत्र हि हिन्दुदेशे मैवास्तु सम्राट् क्षणमेकमेव ।
इत्येव वाञ्छा मम पामरस्य स्वातन्त्र्ययुद्धव्रतदीक्षितस्य ॥५७॥
स्वधर्मनिष्ठो रघुनाथवंश्यो रणाग्रयायी नृपनीतिविज्ञः ।
भवान् भवेच्चेदिह वीर! सम्राड् मनीषितं मे सफलं समग्रम् ॥
सैनाचरोऽहं भवदाधिपत्ये निष्कोषितासिस्तुरगाधिरूढः ।
परिभ्रमन् भारतमस्मदीयं निर्म्लेच्छसाम्राज्यमिदं करिष्ये ॥५९॥
राज्याभिषेके भवतश्च भाव्ये हर्षातिरेकोन्मदमानसोऽयम् ।
स्वधर्मसम्राजमहं भवन्तं भक्त्या करिष्ये प्रथमं प्रणामम् ॥६०॥

* * *

इति वाचिकमाकर्ण्य शिवसन्दिष्टमुज्ज्वलम् ।
सहसा जयसिंहोऽसौ गतनिद्र इवाभवत् ॥६१॥
चिरदास्यपरिक्षीण-स्वाभिमानशुभार्चिषि ।
हृदि तस्य नव ज्योतिर्दिदीपे खलु किञ्चन ॥६२॥
पूर्वं कदाप्यनुद्भूतो निशीथ इव भानुमान् ।
स्वाभिमानः समुद्दीप्तो हृदये तस्य धीमतः ॥६३॥
निध्यायन्निव तं भूयः सन्देशं हृदयंगमम् ।
तस्थौ स सुचिरं ध्याननिमीलितविलोचनः ॥६४॥

वृद्धं पण्डितरावं तं शिवप्रतिनिधिं द्विजम् ।
नवप्रश्रयनम्रोऽसौ जयसिंहोऽब्रवीद् वचः ॥६५॥

" प्रीतोऽस्मि वचसाऽनेन स्वामिनस्तव धीमतः ।
नार्कणितः खलु क्वापि सद्विवेको मयेदृशः ॥६६॥

विना पुण्येन लोकेऽस्मिन् काले च कलिदूषिते ।
निष्कामकर्मयोगित्वं संभवत्येव नेदृशम् ॥६७॥

धृतराष्ट्रेन कृष्णोक्तो बोधः संजयतः श्रुतः ।
मयाऽद्य शिवराजोक्तो भवत्तस्तादृशः पुनः ॥६८॥

चिरस्य दास्यसंभूतो व्यामोहो मे लयं गतः ।
विशुद्धभावगम्भीरं श्रुत्वेदं शिववाचिकम् ॥६९॥

लोकोत्तरचरित्रं तं स्वामिनं ते विवेकिनम् ।
मिथोऽत्र द्रष्टुमिच्छामि विप्र ! केनापि हेतुना ॥७०॥

यथा प्रियतमो लोके रामसिंहो ममात्मजः ।
तथा वाऽथ ततो नूनं शिवराजो मतोऽधुना ॥७१॥

स ममावासमभ्येतु शस्त्रहीनो विना भयम् ।
अरातिष्वपि कापट्यं राजपूता न कुर्महे ॥७२॥

इत्युक्त्वा प्रददौ तस्मै सत्यत्वप्रतिबोधनम् ।
तुलसीबिल्वपत्राणां पुञ्जं देवार्चनार्पितम् ॥७३॥

तं पत्रपुञ्जमतिपूततमं स्वमूर्ध्नी
संस्पृश्य स द्विजवरो रघुनाथनामा ।
तद्दर्शनोत्सुकममुं प्रियदर्शनं च
प्राप्तः शिवं प्रति यथावसरं सुखेन ॥७४॥

॥ इति श्रीशिवराज्योदये महाकाव्ये जयसिंहप्रबोधनम् नाम
४९ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

श्रीशिवराज्योदये महाकाव्ये ५० तमः सर्गः

जयसिंहाभिप्रायः

अथापरेऽह्नि प्रयतो भवानीं प्रणम्य भक्त्या जननीं च पूज्याम् ।
तं द्रष्टुकामो जयसिंहराजं शिवः प्रयाणाभिमुखो बभूव ॥१॥
सोऽनुप्रयातो रघुनाथपन्तमुख्यैर्द्विजैः सप्तभिरात्मनीनैः ।
मेने जनस्तं पथि वीक्ष्य वन्द्यं शिवं हि सप्तर्षिगणानुयातम् ॥२॥
नृवाह्ययानान्यधितस्थिवांसः ते प्रापुरारादरिसैन्यवासात् ।
तत्कालमेव प्रसृता समन्तात् साश्चर्यभूता बत किंवदन्ती ॥३॥
शिवाजिरायाति समीपमेवेत्यत्यद्भुतं वृत्तमदो विदन्तः ।
चकम्पिरे केचन केचिदन्ये प्रस्विन्नगात्रा अभवन् प्रवीराः ॥४॥
समुत्सुकाः केचन वीक्षितुं तं प्रख्यातकीर्तिं जगदेकवीरम् ।
समीपगं वीक्ष्य तु कम्पिताङ्गा हठान्न्यरुन्धन् हृदये दिदृक्षाम् ॥५॥
गत्वाऽग्रतोऽसौ रघुनाथपन्तः सुहृत्परीतं जयसिंहराजम् ।
कृतप्रणामो निजगाद मन्दं स्वामी स्वयं प्राप्त इहेति राजन् ॥६॥
आकस्मिकं वृत्तमदो निशम्य सर्वेऽप्यधीरा हृदये बभूवुः ।
आश्चर्यविस्फारितलोलनेत्रा अन्योन्यमैक्षन्त चलाचलाङ्गाः ॥७॥
तेषामवोचज्जयसिंह एकः कथञ्चन स्तम्भितविक्रियोऽसौ ।
यत् सन्धिकामं शिवराजमेते द्रष्टुं वयं भूरि समुत्सुकाः स्मः ॥८॥
ततः प्रविष्टः पटमण्डपान्तरन्वीयमानः प्रियविप्रवर्यैः ।
अभ्युद्गतश्चानतराजपूतैः शुचिस्मितो धीरगतिः शिवाजिः ॥९॥
प्रवेश्यमानं शिवमुत्प्रसन्नम् अमी प्रवीरा जयसिंहमुख्याः ।
सभाजयामासुरतीव दक्षाः सप्रश्रयोत्थापनवन्दनेन ॥१०॥
पुरः सरन्तं निजधर्मबन्धुं रत्नावलीमण्डितहृत्कपाटम् ।
सस्नेहमाश्लिष्यदसौ शिवोऽपि सद्भावपूर्णेन हृदातिगाढम् ॥११॥
आलिङ्गनं तत् सहसा विलोक्य निसर्गधीरोऽपि स राजपूतः ।
स्मृत्वाऽफझुल्लस्य वधेतिवृत्तं स्थिरोऽपि कायेन हृदा चकम्पे ॥१२॥
महार्हरत्नैर्मधुगन्धमाल्यैः सुवर्णवस्त्रैः कमनीयशस्त्रैः ।
ताम्बूलदानैः सुरभिप्रसेकैः अन्योन्यसम्मानविधिर्बभूव ॥१३॥
ततः स शृण्वन् सततप्रवृत्तं पुरन्दरेऽस्त्रध्वनिमुन्नदन्तम् ।
जगाद धीरं शिव आत्मनैव राजन्! दत्तस्तत्र दुर्ग एषः ॥१४॥

नियुध्यमाना मम बान्धवास्ते प्राणप्रियाः युद्धहतावशेषाः ।
तवाज्ञया यान्तु सपद्यशेषा दुर्गाद् बहिः शीघ्रमविघ्नमेव ॥१५॥

तत्कालमेव प्रययौ सवेगं सेनाचरः कश्चन पत्रवाहः ।
चिरप्रवृत्तं रणदाववह्निं निर्वापयिष्यन्निव तोयवाहः ॥१६॥

ततः स राजा जयसिंहनामा भृशं प्रसन्नः शिवदर्शनेन ।
पृष्ट्वा सहार्दं हि कुटुम्बवार्तां मनोगतं स्वं निजगाद मन्दम् ॥१७॥

धन्या वयं नूनमिमे प्रकामम् ईक्षामहे यत् पुरतो भवन्तम् ।
भवादृशो निर्मलपुण्यशीलाः न दृक्पथं भाग्यमृते प्रयान्ति ॥१८॥

क्वाऽस्मन्निवासः क्व भवन्निवासः क्व चोद्यमो नो भवतः पुनः क्व ।
अभूतपूर्वेण परन्तु राजन् वैरेण नावद्य समागतौ स्वः ॥१९॥

न वैरभावो मयि लेशतोऽपि भवन्तमुद्दिश्य पवित्रशीलम् ।
सेवामयो हन्त तु दासधर्मः निष्पापकं पापविधौ नियुङ्क्ते ॥२०॥

आबाल्यतोऽसावमितप्रभावो दिल्लीश्वरो मे जगदीश्वरोऽभूत् ।
कायेन वाचा मनसेन्द्रियैश्च नक्तंदिवं संपरिसेवितश्च ॥२१॥

तत् पुण्यकार्यं भवतः समस्तं जानन्नपीदं नृपपीठनिष्ठः ।
इच्छन् भवद्भद्रमपि प्रकामं साम्राज्यविद्रोहमहं न कुर्याम् ॥२२॥

सार्धं मयाऽसौ च दिलेरखानो दिल्लीश्वरेण प्रहितोऽत्र देशे ।
समग्रसेनाधिकृतोऽपि नूनं मनाक् परायत्त इवास्मि कार्ये ॥२३॥

समस्तमेतद् भवतः स्वराज्यं विजेतुमव्याहतसंगरेण ।
साम्नाऽथवा सर्वहरेण वीर संप्रेषितोऽस्म्यत्र नराधिपेन ॥२४॥

आबाल्यतोऽहर्निशमेव राजन् युद्धेषु विध्वंसमयेषु यातम् ।
आयुर्मदीयं च तथा त्वदीयं प्रभूतचिन्तानलदग्धसौख्यम् ॥२५॥

न कामयेऽतः खलु युद्धमिद्धं सद्धर्मनिष्ठस्य तव स्वराज्ये ।
प्रदीयतां सामनिदानभूतं दिल्लीन्द्रसंतोषकरं प्रदानम् ॥२६॥

पुरन्दरः साकर-रुद्रमालौ-तिकोन-तुङ्गौ नर-रूप-मानाः ।
भण्डार-खण्डागल-सोन-लोहा-कोण्ड्राण-माणिक्य-पलाश-बरुताः ॥२७

इत्यादयस्ते गिरिशृङ्गसंस्थाः दुर्गास्त्रयोविंशतिरेव राजन् ।
वित्तं तथा पञ्चगुणाष्टलक्षं जानीहि दिल्लीपतितुष्टये स्यात् ॥२८॥

बालोऽपि पुत्रस्तव शम्भुराजः दीयेत सम्मानपदं महीयः ।
तदाधिपत्ये परितश्चरेयुः तुरङ्गमाः पञ्चसहस्रसंख्याः ॥२९॥

वीरश्च नेताजिरसौ त्वदीयः सेनापतिस्तत्प्रतिहस्तभूतः ।
अस्मिन् प्रदेशे विदधातु यत्नं दिल्लीन्द्रसाम्राज्यविवर्धनार्थम् ॥३०॥

Scanned by CamScanner

एवंविधः सन्धिरमुष्य राजन् राजाधिराजस्य सुसंमतोऽस्ति ।
अकार्यकार्येषु विवेकभाजो मन्ये तथैवास्तु तवापि धीर ॥३१॥
अङ्गीकृतेऽस्मिन् समये समस्ते त्वया कथञ्चित् समयेऽधुना हि ।
सम्राडसौ दुर्धरशक्तिशाली त्वय्यप्रसन्नोऽपि भवेत् प्रसन्नः ॥३२॥
इत्थं वचस्तत् प्रतिकूलभूतम् आकर्ण्य धीरः स हि निर्विकारम् ।
सुदूरदर्शी स्मितपूर्वभाषी वक्ष्ये विमृश्येति जगाद मन्दम् ॥३३॥
दिनत्रयं तत्र सुहृद्गणेन संमन्त्र्य कालोचितमात्मकार्यम् ।
बलाबलं स्वं परमप्यवेक्ष्य तमेव सन्धिं बत सोऽनुमेने ॥३४॥
ततः शिवाजिं समरप्रवीणं तथा च नेताजिमुदग्रवीर्यम् ।
सहायमादाय ययौ विजेतुं विजापुरेशं जयसिंहराजः ॥३५॥
मार्गे तदीयान् विविधांश्च दुर्गान् अयत्नतः सानिकिनी जयन्ती ।
विजापुरं चापि सुरक्षितं तद् हठादिवाभ्याक्रमितुं प्रतस्थे ॥३६॥
तदा सुहृद्भूतममुं शिवाजिं कथञ्चिदुद्बोधयितुं स राजा ।
मिथो निशीथे सहसा जगाद हितेच्छया स्वाभिमतं विचारम् ॥३७॥
यद् वाचिकं मां प्रहितं पुरस्तात् सखे त्वया मङ्गलभावहृद्यम् ।
मुहुर्मुहुः संध्वनदन्तरङ्गे व्यामोहितं बोधयतीव तन्माम् ॥३८॥
दुष्पारतन्त्र्य-प्रहते हि राष्ट्रे स्वातन्त्र्यसंस्थापनमेव धर्मः ।
यत् त्वन्मतं वाचिकसारभूतं प्रत्यक्षरं तत् खलु सम्मतं मे ॥३९॥
स्वातन्त्र्यसंस्थापनधर्मकार्यं मित्र त्वया यत् कृतमेककेन ।
तन्म्लेच्छदास्येन मयाऽधमेन यत् खण्ड्यते तत् तुदते हृदन्तः ॥४०॥
अतोऽत्र कार्ये परमोपकारि किञ्चिद् विवक्ष्याम्यहमद्य बन्धो ।
सम्यग् विमृश्यात्महिताहितानि कर्तुं यथाभीप्सितमर्हसि त्वम् ॥४१॥
दुर्गप्रदानेन तवाऽधुना हि दिल्लीश्वरस्त्वय्यतिसुप्रसन्नः ।
स राजधान्यां यदि वीक्षते त्वां मन्ये भृशं प्रीततरश्च भूयात् ॥४२॥
मा तेऽस्तु शङ्का हृदि वाऽथ भीतिः औरङ्गजेबं प्रति संप्रयातुम् ।
त्वद्रक्षणे स्याद् भृशमप्रमत्तो मदात्मजस्तत्र हि रामसिंहः ॥४३॥
तथैव चान्ये मम राजपूता वशंगता ये सततोपकारैः ।
मदाज्ञया त्वत्परिरक्षणार्थं तेऽहर्निशं जागरिणश्चरेयुः ॥४४॥
मयाऽपि पत्रैर्बहुधा स सम्राड् अभ्यर्थितस्त्वामभिवीक्षितुं च ।
समीहते साम्प्रतमात्मनैव त्वद्दर्शनं दुर्लभदर्शनोऽसौ ॥४५॥
वीक्षस्व पृथ्वीपतिराजधानीं महासमृद्ध्या खलु यातिशेते ।
पुरीं मघोनोऽप्यमरावतीं तां किं वाऽलकां वैश्रवणस्य लङ्काम् ॥४६॥

Scanned by CamScanner

त्वामागतं वीक्ष्य निजान्तिकेऽसौ मन्ये नितान्तं हि भवेत् प्रसन्नः ।
दद्याच्च सद्वीरवराय तुभ्यं सर्वंकषं दक्षिणदिक्पतित्वम् ॥४७॥
बालोऽपि पुत्रस्तव शम्भुराजो दिल्लीश्वरानुग्रहपात्रभूतः ।
नूनं तदैवात्मसुदैवयोगात् लभेत संमानपदं महीयः ॥४८॥
यामीहसे प्रार्जयितुं सखे त्वं रणश्रमेण क्रमशो नृपर्द्धिम् ।
तामश्रमेणैव हि सुप्रसन्नाद् विन्दस्व दिल्लीश्वरतः समग्राम् ॥४९॥
तत् प्रार्थये बान्धवसौहृदेन राजंस्तवात्यन्तहिताभिलाषी ।
अतः परं मद्वचसा प्रयाहि पृथ्वीपतेर्मङ्गलदर्शनार्थम् ॥५०॥

इति मतं जयसिंहनिवेदितं
तदवगत्य विमृश्य च सर्वथा ।
समभियातुमहो दिशमुत्तरां
हृदि विनिश्चितवान् सहसा शिवः ॥५१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये जयसिंहाभिप्रायो नाम
५० तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५१ तमः सर्गः ॥

राष्ट्रहितोपदेशः

अथ प्रभूतसैन्येन युध्यमानो विजापुरे ।
आक्रान्तः सहसा प्राप जयसिंहः पराजयम् ॥१॥

तेनात्यन्तमधिक्रुद्धो भुजङ्गम इवाहतः ।
वीरो दिलेरखानोऽसावुज्जगार विषं गिरा ॥२॥

शत्रुपक्षानुकूलोऽयं शिवाजिः कपटी महान् ।
अस्मत्सेनापराभूतेः स निदानं मतो मम ॥३॥

तमहं सदनाविष्टं विषन्धरमिव स्वयम् ।
निहन्मि च्छद्मना किं वा घातयिष्यामि घातकैः ॥४॥

ज्ञात्वा तादृगभिप्रायं दिलेरमविवेकिनम् ।
चिन्ताक्रान्तमना आसीज्जयसिंहो महामतिः ॥५॥

शिवाजिरपि तं पश्यन् रोषाविलविलोचनम् ।
इङ्गितज्ञः क्षणाज्जज्ञौ दिलेरं दूषिताशयम् ॥६॥

विनिर्यातुमना दूरं ततः सङ्ग्रामभूमितः ।
जयसिंहं जगादासौ निशीथे स्वमतं मिथः ॥७॥

राजन्नेकत्र संग्रामसुव्यग्रे प्रबले रिपौ ।
विषयेऽन्यत्र तस्यैव कर्तव्यः सहसाऽऽक्रमः ॥८॥

अप्यपारबलः शत्रुर्द्विधाक्रमणकुण्ठितः ।
अवशो हि वशं याति विन्दते वा पराभवम् ॥९॥

तदाक्रमितुमिच्छामि शत्रुनिघ्नमनुत्तमम् ।
तूर्णं पर्णालिदुर्गं तं यो मत्परिचितो दृढम् ॥१०॥

प्रत्युत्पन्नधियस्तस्य शिवस्येदं हि भाषितम् ।
चिन्ताकुलमतेरासीज्जयसिंहस्य सम्मतम् ॥११॥

सहस्रद्वयसंख्याकमश्वानीकं सुदुर्धरम् ।
समादाय प्रतस्थेऽसौ वायुवेगेन वीर्यवान् ॥१२॥

अविश्रान्तं प्रधावत् तत् सैन्यं शिवधुरन्धरम् ।
पञ्चभिर्दिवसैरेव प्राप्तं पर्णालपर्वतम् ॥१३॥

तत्र जन्यमभूद्घोरं निशीथेऽन्धतमोमये ।
प्रस्फुरत्करवालार्चिर्दृष्टोच्छलितशोणिते ॥१४॥

Scanned by CamScanner

प्रबलेनारिसेनायाः प्रतीकारेण कुण्ठितः ।
रणभूमेर्विनिर्वृत्तः शिवो दुर्गान्तरं ययौ ॥१५॥

सङ्ग्रामान्ते समायान्तं नेताजि वीक्ष्य तत्र सः ।
ईषद्रोषाभिभूतस्तं स्वाधिकारान्न्यवर्तयत् ॥१६॥

तमसाधारणं वीरं वृकयुद्धविशारदम् ।
स्ववशे स्थापयामास विजापुरनराधिपः ॥१७॥

लब्ध्वा तदीयसाहाय्यं नेताजी रणकोविदः ।
भृशं प्रपीडयामास जयसिंहवरूथिनीम् ॥१८॥

विशालदुर्गसंस्थोऽसौ शिवाजिरपि विक्रमी ।
स्वगणैः पीडयामास विजापुरवरूथिनीम् ॥१९॥

इति नीतिप्रयोगेण शिवराजस्य तादृशा ।
उभावपि रिपू म्लेच्छौ घोरामापदमापतुः ॥२०॥

ततो दिल्लीपतेराज्ञामवाप्य चिरमर्थिताम् ।
जयसिंहोऽर्थयामास शिवं पृथ्वीन्द्रदर्शने ॥२१॥

उचितानुचितं सर्वं सुविमृश्य हिताहितम् ।
अङ्गीचकार तां तस्य शिवः सविनयार्थनाम् ॥२२॥

ततो दूरप्रवासार्थी स स्वातन्त्र्यहितोत्सुकः ।
तद्वियोगाकुलानाप्तान् हितबोधमुपादिशत् ॥२३॥

“बान्धवा राज्यमस्माकं सर्वलोकहितैषिणा ।
आपन्नजनरक्षार्थं घटितं परमात्मना ॥२४॥

मयीतो निर्गते दूरं सहसा दिशमुत्तराम् ।
जिजादेव्या निदेशा वो भवन्तु पथदीपकाः ॥२२॥

स्वामिनो रामदासस्य युक्तायुक्तविवेकिनः ।
हितबोधमनुत्सृज्य हितमेव सदा भवेत् ॥२६॥

सेनानीः सैनिको मन्त्री नौपतिर्दुर्गपालकः ।
अधिकारपदं स्वं स्वं रक्षत्वामरणं दृढम् ॥२७॥

न लोभादथवा कामान्न भयान्नाऽथवाऽन्यथा ।
श्रद्धये विचलेज्जातु कोऽपि वः स्वस्वकर्मतः ॥२८॥

श्रुतिस्मृतिपुराणज्ञा ब्राह्मणा संशितव्रताः ।
न भजन्तु मनाग् भीतिं स्वराज्येऽस्मिन् कदाचन ॥२९॥

यतीनां भक्तियुक्तानां साधूनां वाऽथ योगिनाम् ।
आशिषः सततं ग्राह्या अभीष्टफलदायिकाः ॥३०॥

Scanned by CamScanner

प्रजाहितं हितं राज्ञस्ततोऽन्यन्नैव किञ्चन ।
तदसिद्धौ वृथा तस्य ह्यायुःकीर्तिर्बलं धनम् ॥३१॥
पितृमात्रादिहीना वा नेत्रगात्रादिवर्जिताः ।
पुत्रवत् परिपाल्यास्ते परमेशकृपैषिभिः ॥३२॥
दुर्गोत्थितमिदं राज्यं सर्वथा दुर्गरक्षितम् ।
दुर्गा दुर्गालया नूनं सह्याद्रिशिखरस्थिताः ॥३३॥
धीराणां स्वत्वनिष्ठानां कार्याकार्यविवेकिनाम् ।
अल्पीयसामपि सतां संहतिर्हि गरीयसी ॥३४॥
क्षत्रियेषु स्थिता चण्डी ब्राह्मणेषु सरस्वती ।
सोद्यमेषु वणिक्ष्वेव लक्ष्मीः प्रकृतिचञ्चला ॥३५॥
पृथ्वीमूल्यानि रत्नानि महार्हवसनानि च ।
रसायनानि चित्राणि संचिन्वन्ति वणिग्जनाः ॥३६॥
अतः स्वराज्यनिष्ठानां कुलशीलवतां तथा ।
वणिजां संग्रहो राज्ये कार्यः सर्वसमृद्धये ॥३७॥
शूरहस्तगतं शस्त्रं तद् राज्यकवचं दृढम् ।
राज्येऽतः संग्रहः कार्यः शस्त्राणां शस्त्रिणां तथा ॥३८॥
उलूकवाहना पद्मा शारदा हंसवाहना ।
मृगेन्द्रवाहना दुर्गा जयश्रीर्हयवाहना ॥३९॥
उष्ट्रानीकं गजानीकं रथानीकं सुदुर्जयम् ।
न तुरङ्गमसैन्यस्य कलामर्हति षोडशीम् ॥४०॥
सुदृढं नौदलं यस्य स्वामित्वं तस्य सागरे ।
नानादेशस्थिता सम्पत् तं प्रत्येव प्रधावति ॥४१॥
अतो नैकविधा नावो नानाशस्त्रास्त्रपूरिताः ।
स्थाने स्थाने विधातव्या निजराज्याभिवृद्धये ॥४२॥
लोको जीवति धान्येन धान्यं तोयेन वर्धते ।
न विना तोयदैस्तोयं तद्वृष्टिर्न विना वनम् ॥४३॥
अतः प्रभूतयत्नेन वनानि विविधानि हि ।
रक्ष्याणि तुङ्गवृक्षाणि लोकजीवनमिच्छता ॥४४॥
रूपाजीवा विटाश्चेटा नर्तका गायका नटाः ।
वर्धयन्ते भोगवृत्तिं पौरुषं घ्नन्ति सर्वथा ॥४५॥
स्वधर्मस्य स्वदेशस्य स्वजनस्य हिताय च ।
ये निगूढमगूढं वा द्रुह्यन्ति स्वे परेऽथवा ॥४६॥

Scanned by CamScanner

येन केन प्रकारेण तादृशा लोककण्टकाः ।
समूलघातं हन्तव्या निर्वास्या वा स्वदेशतः ॥४७॥

कुलीनाः कृतकर्माणो निरालस्या जितेन्द्रियाः ।
उच्चाधिकारं नेतव्या नीतिविज्ञा विचक्षणाः ॥४८॥

सेर्षा दुर्व्यसनाधीना मृषावाचोऽपहारकाः ।
अधिकाराद् विनिष्कास्याः सहसैवाधिकारिणः ॥४९॥

महतोऽपि हि राष्ट्रस्य परराष्ट्रावलम्बिनः ।
रक्षणे भरणे ज्ञाने समुत्थानं न शक्यते ॥५०॥

अतोऽल्पिष्ठमिदं राज्यं कृच्छ्रेण महतार्जितम् ।
परावलम्बितां जातु भजतां न कथञ्चन" ॥५१॥

इत्थं निजप्रियजनान् बहुधोपदिश्य
स्वातन्त्र्यरक्षणकृते नृपनीतितत्त्वम् ।
देवांस्तथा स्वजननीं च मुहुः प्रणम्य
दिल्लीश्वरं प्रति शिवः ससुतः प्रतस्थे ॥५२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये राष्ट्रहितोपदेशो नाम
५१ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५२ तमः सर्गः ॥

शिवप्रकोपः

अथ फाल्गुनमासस्य नवम्यां सुदिने सुदि ।
शिवः सुहृद्वरैः सार्धं प्रतस्थे दिशमुत्तराम् ॥१॥
पथि तस्य निवासार्थं निर्जनासु स्थलीष्वपि ।
दिल्लीपतिनिदेशेन रचिता रम्यमण्डपाः ॥२॥
सर्वे त्रैवर्णिकाः शूद्राः ग्रामीणा नागरास्तथा ।
चित्रवेशा भिन्नभाषाः प्रसेदुः शिवदर्शनात् ॥३॥
तीर्थे तीर्थे कृतस्नानः समभ्यर्चितदैवतः ।
संश्रुतस्थानमाहात्म्यः स परां मुदमन्वभूत् ॥४॥
इतिहासपुराणेषु प्रसिद्धाः संगरस्थलीः ।
यत्र तत्र समालोक्य श्रुतपूर्वं समस्मरत् ॥५॥
उत्तीर्य भीमां गोदां च तपतीं नर्मदां नदीम् ।
विन्ध्यमुल्लङ्घ्य दुर्लङ्घ्यं प्राप चर्मण्वतीतटीम् ॥६॥
ततः श्रीकृष्णचन्द्रस्य जलक्रीडा-सुखप्रदा ।
कृष्णकान्तिमयी दिव्या तटिनी प्राप हृत्पथम् ॥७॥
स्मृत्वैव तां स सस्मार मात्रा बाल्ये निवेदिताः ।
बाललीला मुकुन्दस्य भक्तवृन्दमनोहराः ॥८॥
अनध्यस्तविवर्तस्य कृष्णस्य पदचिह्निताम् ।
ववन्दे शिरसा धूलीं कृष्णभक्त्यार्द्रमानसः ॥९॥
ततो वैशाख-राकायां यमुनातीर-संस्थिताम् ।
समायातः स निर्विघ्नमागराख्यां महापुरीम् ॥१०॥
आत्मजो जयसिंहस्य रामसिंहाभिधस्तदा ।
राजसेवाविधौ मग्नो न तं प्रत्युज्जगाम ह ॥११॥
यथोचितं तदातिथ्यं देवत्वमतिथेः स्मरन् ।
अकरोद् धर्मशालायां कश्चिद् गिरिधराभिधः ॥१२॥
अथान्येद्युः प्रववृते महाञ्जन्मदिनोत्सवः ।
नृपस्यौरङ्गजेबस्य राजनिष्ठाभिनन्दितः ॥१३॥
मध्याह्नसमये राजप्रासादस्थसभालयम् ।
निनाय चात्मना सार्धं जयसिंहात्मजः शिवम् ॥१४॥

Scanned by CamScanner

नभश्चुम्बीनि चित्राणि हर्म्याणि धनिनां पथि ।
उद्यानानि च रम्याणि शिवः साश्चर्यमैक्षत ॥१५॥
आचारलाजैः कुसुमैः कुङ्कुमैर्दीपदर्शनैः ।
उपायनप्रदानैश्च लोकाः शिवमपूपुजन् ॥१६॥
स्वत्वाभिमानिनस्तत्र हिन्दवस्ते सहस्रशः ।
शिवं सभाजयामासुर्जय जीवेति गर्जितैः ॥१७॥
ततश्चोत्तुङ्गवप्राङ्कः प्रगाढपरिखायुतः ।
शोणवर्णो महाद्वारो नानारक्षकरक्षितः ॥१८॥
यमुनातटसंस्थोऽसौ प्रासादो म्लेच्छभूपतेः ।
प्रदीप्तारक्तनेत्रेण शिवेन ददृशे पुरः ॥१९॥
तत्र चौरङ्गजेबस्य द्रष्टुं जन्मदिनोत्सवम् ।
अहंपूर्विकया प्राप्ताः सर्वे साम्राज्यसेवकाः ॥२०॥
दुर्गपाला वणिग्वर्या अमात्या सैन्यनायकाः ।
नानादेश्या राजदूता विचित्रोष्णीषधारिणः ॥२१॥
सौवर्णवसनाः सर्वे रत्नालङ्कारभूषिताः ।
प्रसन्नवदना राजभक्त्याऽवनतमस्तकाः ॥२२॥
शिवस्यागमनं ज्ञात्वा सभायां सुप्रतीक्षितम् ।
सभ्या आश्चर्यवत् सर्वे सहसासंस्तदुन्मुखाः ॥२३॥
सम्राडौरङ्गजेबोऽपि दूरादालोकयन्नमूम् ।
दीप्तौजसाऽभवन्नूनं क्षणं प्रतिहतेक्षणः ॥२४॥
स च सिंहगतिर्वीरो धृतपुत्रकराङ्गुलिः ।
प्राप नातिचिरेणैव राजसिंहासनान्तिकम् ॥२५॥
सिंहासनाग्रतो दृष्ट्वा शिवाजिं सिंहविक्रमम् ।
शास्ताखानादयः केचित् भृशं हृदि चकम्पिरे ॥२६॥
देशकालविशेषज्ञः शिवस्त्रिरनमत् तदा ।
ईश्वरं पितरं चित्ते संस्मरन् मातरं तथा ॥२७॥
प्राभृतानि महार्हाणि ह्यात्मजस्य तथात्मनः ।
राज्ञे समर्पयामास राजरीतिं प्रपालयन् ॥२८॥
सोऽपि म्लेच्छमहाराजः समस्तं तदुपायनम् ।
पाणिस्पर्शेण जग्राह शिवमालोकयन् रुषा ॥२९॥
पदाधिकारी कश्चित् तं दविष्टमादिशत् पदम् ।
यत्रासन् नतमूर्धानो दासा म्लेच्छमहीपतेः ॥३०॥

Scanned by CamScanner

जसवन्तसिंहप्रमुखांस्तत्रालोक्य पुरःस्थितान् ।
स्वराज्याक्रमणे भूयः निजसेनापराहतान् ॥३१॥
स्वत्वाभिमानी वीरोऽसौ विज्ञाय तमनादरम् ।
जगर्ज सहसा क्रुद्धः कम्पयन् राजमन्दिरम् ॥३२॥
रामसिंह ! विजानीहि य एतेऽत्र पुरःस्थिताः ।
मदीयवीरखड्गाग्रैः पृष्ठभागे प्रताडिताः ॥३३॥
विजापूरमहीपालस्तथा दिल्लीश्वरोऽप्ययम् ।
जाने सम्यग् विजानाति मत्कृपाणप्रदीप्तताम् ॥३४॥
नाहमिच्छामि राज्ञोऽस्य युक्तायुक्ताविवेकिनः ।
सभायामत्र संस्थातुं भीरवो यत्र मेऽग्रतः ॥३५॥
ताम्बूलमपि नात्रत्यं ग्रहीतुं कामयाम्यहम् ।
किं पुनस्तं हि संमानं जघन्यजनकाङ्क्षितम् ॥३६॥
बध्नन्तु राजदासा मां घ्नन्तु वा नचिरादिह ।
न पुरः स्थातुमिच्छामि नृपस्यास्याविवेकिनः ॥३७॥
इत्यूचिवान् प्रकोपेन खदिराङ्गारलोचनः ।
राज्ञः पराङ्मुखो भूत्वा बहिर्यातुं प्रचक्रमे ॥३८॥
अदृष्टपूर्वमौद्धत्यं शिवस्यालोक्य तादृशम् ।
चकिताश्चलिताः केचित् केचित् भीताश्च कम्पिताः । ३९॥
शास्ताखानादयः केचित् जानन्तस्तत्पराक्रमम् ।
राज्ञि संकटमुत्प्रेक्ष्य रक्षा दक्षा इवाभवन् ॥४०॥
सोऽपि म्लेच्छमहाराजो दृष्ट्वा सदसि सम्भ्रमम् ।
मेने दुःशकुनग्रस्तं निजजन्मदिनोत्सवम् ॥४१॥
रामसिंहस्तथा तस्य धाष्टर्यं पश्यन् ससाहसम् ।
सम्राजो रोषमुत्प्रेक्ष्य बभूव भयविह्वलः ॥४२॥
कथं रोषोऽपनेयोऽयमनयोरुभयोरपि ।
इति चिन्ताकुला तस्य मतिर्दोलायिताऽभवत् ॥४३॥
तदैवामुं समाहूय प्राह म्लेच्छमहीपतिः ।
किमकारणमेवाऽसौ कुपितो विपिनेचरः ॥४४॥
शिष्टाचारं न जानाति यतोऽसौ राजसंसदः ।
बहिर्यातु सुखेनैव त्वया सार्धमितोऽचिरात् ॥४५॥
समादेशमनुप्राप्य शिवं प्रत्येत्य सत्वरम् ।
सादरं प्रार्थयामास निःश्वसन्तं मुहुर्मुहुः ॥४६॥

Scanned by CamScanner

वीरवर्य ! महाराज ! यदत्रानुचिताप्रियम् ।
घटितं दुष्प्रमादेन तत् कर्तव्यं क्षमास्पदम् ॥४७॥

प्रदानं दानवीरस्य रणवीरस्य विक्रमः ।
दयावीरस्य करुणा क्षमा भूषा महात्मनः ॥४८॥

अलमत्रातिरोषेण सभायां जगतीपतेः ।
निवासभवनं शीघ्रं निर्गच्छावो यथागतम् ॥४९॥

तस्यानुरोधमनुमत्य तदा कथंचिद्
रोषातिरेकपरितप्तसमस्तगात्रः ।
दष्टाधरः सुदृढखड्गनिविष्टमुष्टिः
तत्याज तां यवनराजसभां शिवाजिः ॥५०॥

॥ इति श्रीशिवराज्योदये महाकाव्ये शिवप्रकोपो नाम
५२ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५३ तमः सर्गः ॥

निर्बन्धपाशः

ततोऽपरेद्युर्जसवन्तसिंहो राजस्वसा जाफरमूतंझाद्याः ।
शिवौजसा प्राक् परिदग्धसत्वा मिथो निशीथे नृपतिं प्रपन्नाः ॥१॥

तमब्रुवन् कृत्रिमसुस्मितास्ते सम्राजमेकैकश आत्मरोषम् ।
आकेकराक्षं जपचञ्चलोष्ठं शिवाजिचिन्ताकुलशेमुषीकम् ॥२॥

राजाधिराज! प्रथितोरुकीर्ते! समस्तभूपालनताङ्घ्रिपीठ!
इस्लामधर्मध्वजदिव्यचन्द्र! प्रचण्डसाम्राज्य! हताखिलारे! ॥३॥

तवाद्भुतेनैव महामहिम्ना लोकोऽखिलोऽयं सुखमेधतेऽत्र ।
बिभर्षि स त्वं नयनारविन्दे चिन्ताच्छटां हन्त विचित्रमेतद् ॥४॥

ह्यस्तेऽपि राजेन्द्र! महासभायां पाटच्चरः सह्यवनेचरोऽसौ ।
असह्यमौद्धत्यमचीकरद् यत् तन्नो नितान्तं तुदते हृदन्तः ॥५॥

स मूढधीर्वन्यजनाननेकान् उत्तेजनैर्भूरि सुसंघटय्य ।
छिनत्ति नित्यं कपटप्रयत्नैः मोहम्मदीयं जगदाधिपत्यम् ॥६॥

स वित्तकोषोऽहमदाख्यपूर्वपदे विशाले नगरेऽस्मदीयः ।
हिरण्य-मुक्तामणि-हीरकाढ्यस्तेनैव चौरेण पुरा लुलुण्ठे ॥७॥

सेनाऽस्मदीया जसवन्तधुर्या विगाहमाना विपिनान्यवाच्याम् ।
निगूढमेतस्य हि वन्यदासैरकाण्डसम्पातमतीव जघ्ने ॥८॥

प्रविश्य निद्रासदनं निशीथे ह्यनेन कापट्यविशारदेन ।
त्वन्मातुलस्यापि हठान्निकृत्तं कराङ्गुलीनां त्रिकमुद्धतेन ॥९॥

सा सूरताख्या नगरी गरिष्ठा महाधनोत्तुङ्गसुरम्यहर्म्या ।
अनेन पापेन हृताखिलर्द्धिरङ्गारशेषा विहिता क्षणेन ॥१०॥

नैवास्मदीये नरदेव! राजसभालये केनचिदुन्मदेन ।
कदाचिदद्यावधि साभिमानम् औद्धत्यमाविष्कृतमप्रसह्यम् ॥११॥

हा हन्त किन्तु प्रथितापराधो राजेन्द्र! वन्यस्तव दुष्टशत्रुः ।
सभालये खल्वकरोद् गतेऽह्नि मर्मस्पृशं घोरतमापराधम् ॥१२॥

कृतापराधो बहुधा चिराय पुरे वसत्यत्र रिपुस्तवाद्य ।
स चेदितो याति विनोग्रदण्डं राज्यप्रतिष्ठा निखिलास्तमीयात् ॥१३॥

वचांसि तेषां स्वसुहृज्जनानां शृण्वन् स सम्राड् बत निर्विकारम् ।
कराङ्गुलिस्थां जपरत्नमालां संभ्रामयन् भूरि जहास मन्दम् ॥१४॥

Scanned by CamScanner

जपव्रतस्थं तमभग्नमौनं मन्दस्मिताविष्कृतगूढभावम् ।
औरङ्गजेबं शिरसा प्रणम्य सर्वेऽपि ते स्वं स्वमगुर्निकेतम् ॥१५॥

अथापराङ्मुख एव तत्र स्वावासगेहं परितो भ्रमन्तः ।
सेनाचरा नैकसहस्रसंख्याः शिवेन दृष्टा यवनाः सशस्त्राः ॥१६॥

निमेषमात्रं हि विमृश्य दृश्यं स नीतिविज्ञः सहसा विजज्ञौ ।
आत्मानमावासगृहे सपुत्रं युक्त्या विनिर्बद्धमरातिनालम् ॥१७॥

रिपोरभिप्रायमवेत्य दुष्टं सहायहीनां च दशां स्वकीयाम् ।
संभाविनीमापदमूहमानः सुधीरसौ निर्हतधीरिवासीत् ॥१८॥

तं भ्रातृहन्तारमतिप्रचण्डसामर्थ्यवन्तं पितृघातनीचम् ।
क्रूरस्वभावं स्वरिपुं विमृश्य धीरः प्रकृत्याऽपि शिवश्चकम्पे ॥१९॥

तदैव संप्राप्तमवेक्ष्य पार्श्वे तं भ्रातृकल्पं जयसिंहपुत्रम् ।
शिवः प्रसन्नो नवनीरवाहं दावानलान्तर्गतकेसरीव ॥२०॥

शिवाजिमालिङ्ग्य च धर्मबन्धुं स रामसिंहोऽतिविशुद्धशीलः ।
चिन्ताजडाक्षोऽस्तमितस्मितास्यः प्रचक्रमे वक्तुमतीव मन्दम् ॥२१॥

“राजन्! विजानासि नरासुरोऽयं दिल्लीपतिर्दुष्करपापकर्मा ।
यः स्वार्थलाभप्रतिकूलभूतान् साम्राज्यलाभाय जघान बन्धून् ॥२२॥

दुर्मन्त्रिमन्त्रैर्विषबिन्दुतुल्यैः सुदूषितात्मा स निसर्गपापः ।
दूये नितान्तं गदितुं सखेऽहं त्वां हन्तुमिच्छत्यधुनाऽरिभूतम् ॥२३॥

ज्ञातं मया यत्क्षण एव बन्धो ! चिकीर्षितं मित्रमुखेन तस्य ।
गत्वा द्रुतं संप्रणिपत्य भूयः प्रबोधितोऽसौ बहुधा दुरात्मा ॥२४॥

प्रोक्तं मया यत्पितृदेववाचि विश्वस्य यो दूरमिहाजगाम ।
स रामसिंहस्य हि जीवतो मे प्राणैर्वियुज्येत कथं शिवाजिः ॥२५॥

मदेकनिघ्नं यदि तं शिवाजिं हन्तुं प्रवृत्तोऽसि नरेन्द्र नूनम् ।
मद्रक्तशोणेन विनाऽसिनाऽसौ नान्येन शस्त्रेण हि घातितव्यः ॥२६॥

शपामि सत्येन हि रामचन्द्र-पवित्रवंशोत्तम-संभवोऽहम् ।
नात्याचरेद् नापि बहिश्च गच्छेत् शिवाजिरस्मिन् नगरे निवत्स्यन् ॥

तस्यात्मनीनस्य वचो निशम्य स्वबन्धुसंरक्षणसुव्रतस्य ।
निमील्य नेत्रे सुचिरं निदध्यौ शिवः कृपामात्मनि दीनबन्धोः ॥२८॥

उद्धृत्य संपूजितशम्भुलिङ्गस्थितानि सद्बिल्वदलानि भक्त्या ।
समर्पयन् पाणिपुटे तदीये सगद्गदां वाचमुवाच धीरः ॥२९॥

“अनाथनाथो जगदेकबन्धुः विपन्महासागरदिव्यसेतुः ।
ईशः स नूनं मम रक्षणार्थं तवैव रूपेण सखेऽवतीर्णः ॥३०॥

स्वधर्मसंरक्षण-युद्धसत्र-हविःसदृक्षं खलु जीवितं मे ।
न तत्क्षयं यास्यति विद्धि बन्धो ! विनेच्छया श्रीजगदम्बिकायाः ॥३१॥
वृत्तान्तमेनं झटिति स्वतातं निवेदय त्वं निजपत्रवाहैः ।
स एक एवास्ति समस्तदेशे म्लेच्छाधिपं बोधयितुं समर्थः ॥३२॥
तावत् सुतोऽयं मम शम्भुराजः सामन्तवत् प्राभृतपूर्णपाणिः ।
सार्धं त्वया भूपतिदर्शनार्थं सभालयं प्रत्यहमेव यायात् ॥३३॥
ततः स्वमुक्त्यै च कमप्युपायं स चिन्तयन् सन्ततमाकुलात्मा ।
यथावकाशं समहोपहारं ददर्श कांश्चित् सदमात्यवर्यान् ॥३४॥
स तन्मुखेनार्जवगर्भशब्दैः पत्रैरनेकैर्हृतजीविताशः ।
संप्रार्थयामास सदर्थनीयः म्लेच्छाधिपं तं कुटिलाग्रगण्यम् ॥३५॥
"हे राजराजेश्वर! सद्गुणाब्धे! दयाघनोपासनपुण्यशील!
न त्वत्समोऽन्यो धरणीतलेऽस्मिन् कृतापकारेष्वपि सोपकारः ॥३६॥
वसन् विदूरे गिरिकाननेऽहं भूपालवर्य! त्वदनुग्रहेण ।
प्राप्तोऽसि नन्विन्द्रपुरेऽत्र भव्ये धरातलस्पर्शनमात्रभिन्ने ॥३७॥
यत् स्थावरं जङ्गममत्र लोके किञ्चिन्मदीयं धनमल्पशेषम् ।
तत् सर्वमेवाऽस्मि करोमि वन्द्ये तवाङ्घ्रिपीठे विनयोपहारम् ॥३८॥
याचे विनम्रोऽहमनन्तदोषः नानापराधानलदग्धचेताः ।
अपारकारुण्यमहाम्बुराशे प्रदीयतां मे बत जीवदानम् ॥३९॥
दिल्लीन्द्रसिंहासनभूरिनिष्ठः काङ्क्षामि नैवात्मसुखाय किञ्चित् ।
आदेशमिच्छामि परन्तु गन्तुं त्वदीयसाम्राज्यविवर्धनार्थम् ॥४०॥
बहिश्चरप्राणसमः सुतो मे यः प्रत्यहं राजसभामुपैति ।
साम्राज्यसेवाविधये पुरेऽस्मिन् वसत्वसौ मत्प्रतिभूः सुखेन ॥४१॥
यत् तत् प्रवृत्तं दिशि दक्षिणस्यां विजापुरैश्वर्य-विनाशि-युद्धम् ।
तत्रैव सेनाचरतां वलम्ब्य साम्राज्यवृद्ध्यै नितरां यतेय ॥४२॥
नाभ्यर्थनेयं मम संमता चेत् साम्राज्यसेवैकपरायणस्य ।
तद्दीयतां मेऽनुमतिर्महात्मन् वाराणसीक्षेत्रमितः प्रयातुम् ॥४३॥
संन्यस्य सर्वं सकलत्रपुत्रं काषायकौपीनधरोऽहमेकः ।
परं पदं प्राप्तुमथैश्वरं तद् घोरं चरिष्यामि तपः प्रकामम् ॥४४॥
ये मामकीना निवसन्ति नैके वीराः पुरेऽस्मिंस्त्वदनुग्रहेण ।
ते शीघ्रमेव प्रतियान्तु सर्वे त्वदाज्ञया सह्यवनप्रदेशम् ॥४५॥
यद् रामसिंहेन मदर्थमेव प्रोक्तं प्रतिज्ञावचनं तवाग्रे ।
तस्मात् प्रतिज्ञावचनात् स शीघ्रं विमोच्यतामान्तरपाशबन्धात् ॥४६॥

इत्येवमादीनि वचांसि तस्य सम्प्रार्थनापत्रगतानि भूयः।
श्रुत्वा स सम्राडतिसंशयालुः निर्बन्धपाशान् सुदृढीचकार ॥४७॥
तैर्बन्धपाशैर्नितरां निरुद्धः शिवोऽभवत् कुण्ठितसर्वचेष्टः।
यथा गभीरे यमुनाप्रवाहे कृष्णः पुरा कालियभोगबद्धः ॥४८॥
तां भीषणामापदमात्मबन्धौ विज्ञाय विज्ञः स च रामसिंहः।
तद्रक्षणार्थं नितरां बभूव रात्रंदिवं सन्तत-जागरूकः ॥४९॥
तत्सद्मनोऽन्तर्बहिरासमन्ताद् विशुद्धशीलान् स्वजनान् निगूढान्।
संस्थापयामास वपुः शिवस्य गोप्तुं पवित्रं च यशः कुलस्य ॥५०॥
शिवोऽवरुद्धो यवनाधिपेन कारागृहान्तः सममात्मजेन।
इति प्रवृत्तिः सहसा ससर्प जिजां प्रति क्रूरनिशाचरीव ॥५१॥
वैधव्यविघ्ना जरिताङ्गयष्टिर् नानाव्रतस्था सुतविप्रयोगात्।
श्रुत्वैव तां प्राणहरां प्रवृत्तिं पपात सा रुग्णलतेव भूमौ ॥५२॥
विलुप्तसर्वेन्द्रियकार्यशक्तिः निरुद्धकल्पश्वसनक्रियां ताम्।
आपादयन्तः प्रकृतिं निजां ते ह्याप्ता जनास्तत्सदृशा बभूवुः ॥५३॥
घोराधिगाढान्धतमःप्रविष्टेष्वचेष्टमानेष्वखिलेषु तेषु।
दूरात् समाकर्णि दृढप्रतीतः गुरोः समर्थस्य जयध्वनिः सः ॥५४॥
ध्वनिः स सञ्जीवनमन्त्रभूतः तदैव निर्धूय तदात्मदैन्यम्।
मूर्च्छान्धकारात् सहसा विकृष्य तान् हर्षयामास निमेषमात्रात् ॥५५॥
ततः प्रविष्टस्य गुरोर्गृहान्तर् निपीड्य पादौ निटिलेन भूयः।
सा वीरमाताऽखिललोकवन्द्या स्थूलाश्रुपातैर्निजगाद दुःखम् ॥५६॥
शिवाजिकल्याणपरायणात्मा स शिष्यवाग्भिर्विदितप्रवृत्तिः।
निध्याय किञ्चित् नचिरं तदानीं त्रिकालवेदी निजगाद योगी ॥५७॥
"देवाधिदेवोऽखिलदीननाथः कारालयान्तर्बत जन्म लेभे।
तौ पुण्यशीलौ पितरौ तदीयौ हा निन्यतुस्तत्र सुदीर्घमायुः ॥५८॥
सीता सतीनां धुरि कीर्तनीया प्रातः प्रगेयोज्ज्वलनामधेया।
कोदण्डपाणेरपि धर्मपत्नी दैवेन काराविपदं जगाहे ॥५९॥
अत्रिस्तथा वन्दन-रेभकौ च तपःकृतो मन्त्रदृशो मुनीन्द्राः।
पुराऽसुरैर्दुर्भरपापचारैः कारापदं निन्युरपारतापम् ॥६०॥
इन्द्रः सुरेशो वरुणो जलेशः ब्रह्मा विधीशः सविता ग्रहेशः।
इत्यादयस्ते सकला बतेशाः पौलस्त्यकारातिथयो बभूवुः ॥६१॥

केनापि हि प्राक्तनकर्मणैव प्रायेण सन्तोऽनुविशन्ति बन्धम् ।
स्वेनैव पुण्येन परन्तु काले निश्चप्रचं मुक्तिमवाप्नुवन्ति ॥६२॥
पर्णालदुर्गे सुदृढं निबद्धः शिवः पुरा यद्यपि जौहरेण ।
कृपाकटाक्षक्षपितारिपाशं प्रमोचितोऽसौ परमेश्वरेण ॥६३॥
संसाररूपादतिघोरकारा-निवासतश्चापि य आत्मभक्तान् ।
निर्मोचयत्येव विमुक्तिदाता भजध्वमेकं तमनाथनाथम् ॥६४॥
प्रपन्नभक्तोत्तमपारिजातः स एव सद्भक्तिवशीकृतात्मा ।
विमोचयिष्यत्यनघं शिवाजिं कालेन निःशेषितकर्मभोगम् ॥६५॥

इति गुरुवचनेन क्षीणशोकाभिघाता ।
दलितसकलभीतिर्लब्धधैर्यावकाशा ॥
निजसुतपरिमोक्षं कामयन्ती नितान्तं ।
शिवमभजत देवं मातृदेवी शिवस्य ॥६६॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'निर्बन्धपाशः' नाम ५३ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

श्रीशिवराज्योदये महाकाव्ये ५४ तमः सर्गः
बन्धविमोचनम्

कारालयान्तः सुदृढं निबद्धः किंकार्यतामूढमतिः शिवाजिः ।
अनन्यभावेन हृदाऽनिशं तं भावैकगम्यं प्रभुमेव भेजे ॥१॥
"संसारपाशेन दृढावनद्धान् त्वं मोचयस्यार्तहृदः स्वभक्तान् ।
तन्मां कथं म्लेच्छमहीशपाशे बध्नासि मुक्तिप्रवणं दयालो ॥२॥
दुष्पारतन्त्र्येण चिरस्य बद्धान् जनानिमान् मोचयितुं सयत्नः ।
योऽहं प्रभो! त्वत्कृपया सदाऽऽसं बध्नासि तं मां कथमात्मदासम् ॥३॥
मया हि कामान्धदृशा कदाचिद् विलोकिता काचन चेत् परस्त्री ।
हृद्देशवासिन् ! कृतकर्मसाक्षिन् ! कारालये मेऽत्र वरं प्रणाशः ॥४॥
लोभाभिभूतेन मया कदाचित् स्वस्यैव भोगाय जगन्निवास ।
हृतं धनं चेद् धनिनः प्रसह्य कारालये मेऽत्र वरं प्रणाशः ॥५॥
क्रोधप्रमत्तेन मया कथंचिद् हतः शिशुर्वा स्थविरोऽथ रुग्णः ।
दयानिधे ! तत्फलभागिनो हि कारालये मेऽत्र वरं प्रणाशः ॥६॥
विद्वेषमूढेन मया क्वचिच्चेत् निःपातितं मन्दिरमन्यदीयम् ।
दुष्कर्मणस्तस्य फलाय देव कारालये मेऽत्र वरं प्रणाशः ॥७॥
प्रमाणभूतः परकीयधर्मग्रन्थो मया जातु विनाशितश्चेत् ।
धर्मद्रुहो दुष्कृतिनः परात्मन् कारालये मेऽत्र वरं प्रणाशः ॥८॥
मातुः पितुर्वाऽथ गुरोः कदाचित् कृतं मया चेत् प्रतिकूलभूतम् ।
देवद्रुहोऽक्षम्यकुकर्मणो हि कारालये मेऽत्र वरं प्रणाशः ॥९॥
कर्ताऽथवा कारयिता त्वमेवेत्येतद्धि विस्मृत्य मनोऽभवच्चेत् ।
स्वकर्तृतामत्तमिदं मदीयं करालये मेऽत्र वरं प्रणाशः ॥१०॥
नो चेत् त्वदीये खलु पुण्यकार्ये बद्धव्रतं मां तव दासदासम् ।
विमोचयास्मादतिघोरबन्धाद् जिजातनूजं हतजीविताशम् ॥११॥
नाद्यापि तीर्थान्यखिलानि पुण्यान्युन्मोचितानीश कुदास्यपाशात् ।
तन्मोचनायैव हि मां कृपालो विमोचयास्मादतिघोरबन्धात् ॥१२॥
अद्यापि पापैर्यवनैरहृतानाम् आक्रन्दनान्यार्तकुलाङ्गनानाम् ।
श्रूयन्त एवाऽत्र पवित्रदेशे तन्मुक्तये मोचय मां परात्मन् ॥१३॥
गोब्राह्मणानां परिपालनाय बाल्यात् प्रभृत्येव धृतव्रतोऽस्मि ।
व्रतस्य तस्येश्वर! पूरणार्थं कुरुष्व मां बन्धनपाशमुक्तम्" ॥१४॥

Scanned by CamScanner

स प्रार्थयन्नेवमहर्निशं तं विश्वेश्वरं भक्तिपरिप्लुतात्मा ।
कदाचन ध्मानिमीलिताक्षो व्यलोकयद् दृश्यमदृष्टपूर्वम् ॥१५॥
कारागृहे लब्धजनुं स्वपुत्रं समुद्गके सुष्ठु निवेशितं च ।
मूर्ध्ना वहन्तं यमुनाप्रवाहे ददर्श साक्षाद् वसुदेवमन्तः ॥१६॥
विमुक्त्युपायं तमवेक्ष्य दिव्यं ध्यानावलग्नेन हृदा तदानीम् ।
स्वमुक्तिकार्ये सहसा बभूव लब्धप्रकाशः सुतरां शिवाजिः ॥१७॥
ततोऽनुमत्या यवनाधिपस्य भृत्येष्ववाचीं प्रति निर्गतेषु ।
रहः प्रविष्टः पुररक्षकं तं फौलादखानं स उवाच मन्दम् ॥१८॥
प्रवीर! नूनं नगरेऽत्र भव्ये त्वमेव मे भ्रातृसमः सखासि ।
यन्मामिहानन्यसहायमार्तं रात्रिन्दिवं रक्षसि जागरूकः ॥१९॥
न न्यूनमत्र त्वदनुग्रहेण सुखाय मे वाऽथ मदात्मजस्य ।
तथापि शान्तिं भजते न चेतो गूढेच्छया मित्र वितुद्यमानम् ॥२०॥
वचस्तदाकर्ण्य तदा शिवस्य फौलादखानः स पुराधिकारी ।
प्रफुल्लचक्षुः स्फुटशोणदन्तः प्रोवाच राजन्! वद का तवेच्छा ॥२१॥
प्रसन्नमालोक्य तदीयमास्यं शुचिस्मितोऽसौ पुनरप्युवाच ।
शुभेऽधुना श्रावणमासि नित्यं मिष्टान्नदाने त्वरते मनो मे ॥२२॥
वर्षानिमित्तं बत दूरदेशे न स्वास्थ्यमत्रानुभवामि किञ्चित् ।
मिष्टान्नतुष्टैः सुजनैः प्रदत्तैराशीर्वचोभिर्भविकं भवेन्मे ॥२३॥
औरङ्गजेबस्य शिवाजिघातं विचिन्तनग्रस्तधियोऽधिगम्य ।
मिष्टान्नदानेऽनुमतिं तदैव संरक्षकः स्वानुमतिं ददौ सः ॥२४॥
ततोऽन्वहं भारहरा बलिष्ठाः सूर्यास्तकाले शिवसद्मनस्ते ।
मिष्टान्नपूर्णान् बृहतः करण्डान् दानाय निन्युर्मठमन्दिराणि ॥२५॥
शुचिव्रतेभ्यः प्रतिपाद्यमानं मिष्टान्नमेतन्न हि दूषणीयम् ।
आरक्षकाणामपवित्रहस्तैरित्यन्यसंस्पर्शविधिर्निषिद्धः ॥२६॥
समुह्यमानं सदनात् तदन्नं दिने दिने दीनजनप्रदेयम् ।
स्पर्शं विना दूरत एव दक्षैः स्पृहाकुलैर्द्वाःस्थकुलैरलोकि ॥२७॥
ततश्चतुर्भिर्दिवसैः प्रभाते बहिर्जिनामा स सखा शिवस्य ।
तं रामसिंहं सहसाभ्युपेत्य ह्यस्वास्थ्यविग्नः शिव इत्युवाच ॥२८॥
वार्ता श्रुतासौ बहुभिः सखेदं तथाऽपरेभ्यः कथिता च लोकैः ।
म्लेच्छाधिपेनत्वमुना चरोक्ता सानन्दमाकर्णि महाधमेन ॥२९॥
भिषग्वरेभ्यो विविधौषधानि बहिर्जिरानाययदात्मवद्भ्यः ।
व्याधिस्तु केनाप्यचिकित्सितोऽसौ दिने दिने संववृधे क्रमेण ॥३०॥

Scanned by CamScanner

स्वां रुग्णशय्यां सततं श्रितोऽसौ शिवो भृशं दुर्लभदर्शनोऽभूत् ।
फौलादखानोऽपि हि रोगभीतो न प्राविशत् तं बत रुग्णकक्षम् ॥३१॥

ततो व्यतीते किल कृष्णजन्ममहोत्सवे श्रावणकृष्णपक्षे ।
सायं कदाचित् वसुदेवतुल्यं शिवोऽद्भुतं साहसकर्म चक्रे ॥३२॥

स्मरन्नितान्तं कुलदेवतां स्वां गुरुं समर्थं जननीं च पूज्याम् ।
बृहत्करण्डे निभृतोपविष्टः कारालयं त्यक्तुमसौ प्रवृत्तः ॥३३॥

किशोरकोऽसावपि शम्भुराजः करण्डकेऽन्यत्र दृढं निगूढः ।
पितुर्निदेशान् हृदये दधानः कारालयाद् यातुमभूत् सुसज्जः ॥३४॥

मिष्टान्नपूर्णान्यकरण्डतुल्यावस्पर्शितौ द्वाःस्थगणैरशङ्कम् ।
समूह्यमानौ बत तौ करण्डौ बहिर्गतौ कुत्रचिदञ्जसैव ॥३५॥

नवाम्बुदैर्मेदुरितान्धकारे निशामुखे निर्जनदुष्पथेन ।
करण्डकौ तौ शिवशम्भुगर्भौ नीतौ यथा लुण्टितरत्नकोशौ ॥३६॥

सखा बहिर्जिः शिवतुल्यरूपः करे दधानः कटकं शिवस्य ।
निगूह्य तत्प्रावरणेन चाङ्गं तत्रैव तल्पेऽस्वपदाप्रभातम् ॥३७॥

फौलादखानो निशि गूढमेत्य सुप्तं शिवाजिं तमवेत्य कक्षे ।
मा भङ्क्त निद्रामिति सर्वभृत्यान् आज्ञाप्य सुप्त्यै स्वगृहं जगाम ॥

मदारिनामा च युवा निशान्ते शुश्रूषणे कूट-शिवस्य लग्नः ।
निशस्तुरीये प्रहरे भिषग्भ्यो भेषज्यमानेतुमपप्रयातः ॥३९॥

नराकृतौ तल्पगतोपबर्हे पिधाय तत् प्रावरणं शिवस्य ।
मा भङ्क्त निद्रामिति सर्वभृत्यान् विज्ञाप्य यातः स बहिर्बहिर्जिः ॥

क्रमेण चान्ये सुहृदः शिवस्य प्रयोजनं किञ्चन रक्षकेभ्यः ।
निवेद्य तस्मिन् दिवसे प्रयुक्त्या कारागृहाद् दूरमभिप्रयाताः ॥४१॥

मध्यन्दिनान्ते स पुराधिकारी फौलादखानः शिवमभ्युपेतः ।
गाढप्रसुप्तं तमवेक्ष्य तल्पे चक्रे सुहृद्भिः सह धूम्रपानम् ॥४२॥

चिराय निःशब्दमदः प्रकोष्ठं सर्वत्र विज्ञाय च निर्मनुष्यम् ।
काचिद् विशङ्काच्छुरिका सुतीव्रा चिच्छेद चेतः प्रसभं तदीयम् ॥

शब्दापयंस्तं सहसा बहिर्जिस्तथोच्चकैस्तं युवकं मदारिम् ।
शुश्राव साश्चर्यभयाभिभूतः प्रतिध्वनिं केवलमात्मनोऽसौ ॥४४॥

आकल्यतस्तान् बहिरेव यातान् नानानिमित्तैः सकलान् वगत्य ।
रोगाभिभूतं स हि मूढधीस्तं नूनं शिवाजिं मृतमेव मेने ॥४५॥

शय्यासमीपे सहसोपसृत्य प्रबोधयंस्तं मृदुमन्दशब्दैः ।
निःश्वासशून्यं मृतमेव मत्वा हस्तेन तत्प्रावरणं चकर्ष ॥४६॥

Scanned by CamScanner

शिवाजिशून्यं तदवेक्ष्य तल्पं विस्फारिताक्षः प्रविदारितास्यः ।
संशुष्ककण्ठः स हि नष्टबुद्धिराक्रोशदाविद्धवराहघोरम् ॥४७॥
प्रपूरविध्वस्ततटी नदीव वार्ता ह्यसौ प्रासरदासमन्तात् ।
यां शृण्वता भूमिभुजा सरोषं करेण भालं बहु ताडितं स्वम् ॥४८॥
प्रतीक्षमाणा मरणं शिवस्य राजस्वसाद्याः अधमा यवन्यः ।
प्रवञ्चिता निर्गमनेन तस्य प्रताडयामामुरुरांस्यमन्दम् ॥४९॥
औरङ्गजेबस्य कुशासनेन ह्युद्वेजितास्तेऽखिलहिंदुलोकाः ।
आकर्ण्य वृत्तान्तममुं विचित्रं नितान्तमन्तःकरणे प्रसेदुः ॥५०॥
आदिष्टवांस्तत्क्षण एव भूपः सर्वानमात्याननतिदीप्तरोषः ।
केनाप्युपायेन निरुध्यमार्गे गृह्णीत शत्रुं प्रपलायमानम् ॥५१॥
ग्रामेषु घोषेषु तथा पुरेषु तीर्थेषु खेटेषु च खर्वटेषु ।
प्रख्यापका म्लेच्छनृपप्रयुक्ताः सडिण्डिमं संततमुज्जगर्जुः ॥५२॥
"हं हो जनाः संश्रुणुत प्रकामम् कारालयान्तः सुदृढं निबद्धः ।
पुत्रेण सार्धं प्रपलायितोऽसौ शिवाजिनामा खलु राजबन्दी ॥५३॥
स नातिगौरो न च कृष्णवर्णो नैव स्थवीयान् न तथा कृशीयान् ।
नोत्तुङ्गमूर्तिर्न तथातिखर्वो दीर्घाग्रनासो धृतकुण्डलश्च ॥५४॥
सुश्मश्रुलास्यः पृथुदीप्तनेत्रः खड्गाभिघातव्रणितोत्तमाङ्गः ।
मनोज्ञरूपं दशवर्षदेश्यम् पुत्रं सहादाय पलायतेऽसौ ॥५५॥
जानाति भाषा विविधाः स बाढं वक्त्यारबीं फारसिकीं तथोर्दूम् ।
गीर्वाणवाक्पाटवमप्यमुष्य सत्पण्डितस्येव विलोभनीयम् ॥५६॥
तं वध्यभूतं नृपतेररातिं गृह्णीत यः कश्चन घातयेद् वा ।
पृथ्वीपतिस्तस्य हिरण्यदानैः कुर्वीत पार्यन्तिकमङ्गलानि" ॥५७॥
सर्वत्र रात्रिन्दिवमुध्वनन्ती सा घोषणारादभिघोष्यमाणा ।
मुहुर्मुहुः कर्णपथं प्रपेदे शिवस्य साक्षान् मथुरां गतस्य ॥५८॥
तत्रात्मनीनस्य शुचिव्रतस्य द्विजस्य गेहे त्रिमलाभिधस्य ।
संस्थाप्य गूढं बत शम्भुराजं शिवः प्रतस्थेऽनिलतुल्यवेगः ॥५९॥
तत्रागरायां पुरि गूढचारैः गवेषमाणैः शिवलक्ष्म किञ्चित् ।
बद्धो द्विजस्त्र्यम्बक[1]नामधेयस्तथाऽपरोऽसौ रघुनाथ[2]नामा ॥६०॥
विज्ञाय तौ गूढचरौ शिवस्य फौलादखानः स नितान्तरुष्टः ।
प्रतप्तशस्त्रैः प्रखरप्रतोदैः प्रतर्दयामास चिरं यथेच्छम् ॥६१॥

१ त्र्यम्बक सोनदेव डबीर। २ रघुनाथ बल्लाळ कोरडे।

Scanned by CamScanner

कथं कदा कुत्र पथा च केन पलायितोऽसौ कपटी शिवाजिः ।
निश्चप्रचं ज्ञातमिदं युवाभ्यां प्रब्रूतमात्मा यदि रक्षणीयः ॥६२॥
तौ देहदण्डैर्विविधैर्नितान्तं विच्छिन्नगात्रौ स्रवदस्रधारौ ।
प्राणप्रयाणे समुपस्थितेऽपि मुमुञ्चतुर्नो दृढमौनमुद्राम् ॥६३॥
तथैव केचित् किल रामसिंहसुहृज्जनास्तेन शिवानुकूलाः ।
अनेकसंदेहविमोहितेन प्रर्धषिता भूरि कठोरदण्डैः ॥६४॥
क्रोधानलध्वस्तधियाऽधमेन ह्यौरङ्गजेबेन तदासमन्तात् ।
तीर्थस्थलेषूज्ज्वलमन्दिराणि बहून्यपात्यन्त मनःप्रशान्त्यै ॥६५॥
दिशि दिशि निशि वा दिवाऽविरामं
शतशतशो नितरां परिभ्रमन्तः ।
लघु लघु निजदुर्गमुत्प्रयान्तं
न हि विविदुर्भटरक्षिणः शिवाजिम् ॥६६॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'बन्धविमोचनं' नाम
५४ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५५ तमः सर्गः ॥

मातृपुत्रसमागमः

अथ माता जिजादेवी पुत्रशोकप्रधर्षिता ।
घोरचिन्तापरिप्लुष्टा निर्गलन्नीरलोचना । १॥

दुर्विकल्पाकुलस्वान्ताऽत्यन्तविभ्रान्तचेतना ।
निराहारपरिक्षीणा विवर्णमलिनांशुका ॥२॥

संत्यक्तसर्वचेष्टाऽसौ शिवपूजापरायणा ।
ध्यानेनात्मनि पश्यन्ती शिवं हि शिवरूपिणम् ॥३॥

वीरजा वीरजाया सा वीरमाताऽपि दुःखिता ।
प्रार्थयामास तं भक्त्या परया परमेश्वरम् ॥४॥

"अयि देवकृपा-महाम्बुधे शिव शम्भोऽखिलदीनवत्सल ।
शरणं करवाणि तावकौ चरणावेव विपन्निवारकौ ॥५॥

शरणागतवत्सल! प्रभो! निजभक्तः स मृकण्डुनन्दनः ।
यमपाशवशंगतोऽपि हि स्वयमभ्येत्य सुरक्षितस्त्वया ॥६॥

यवनाधमराजबन्धने भगवन् प्राणहरेऽधुना स्थितम् ।
करुणा-मसृणेन चक्षुषा शिव! तं पश्य शिवं मदात्मजम् ॥७॥

न मनागपि देव! पातकं विहितं येन कदापि किञ्चन ।
सहसे कथमीश बन्धने तव भक्तिप्रवणं सुतं मम ॥८॥

हर ते हरणीयमेव चेदधुनाऽस्मत्कुलजं हि जीवितम् ।
हर मां कृपया कृपानिधे प्रियपुत्रात्मकजीवितामिमाम् ॥९॥

स च मातृविनाकृतः शिशुः शिव! शम्भुः सततं मदाश्रितः ।
जनकेन समं महापदि स्थित उच्चैर्व्यथयतीव मां भृशम् ॥१०॥

गुरुपापकृताऽपि संस्मृतो यदि केनापि कथञ्चन प्रभो ।
निखिलाः खलु तस्य चापदो हरसीति प्रथितं यशस्तव ॥११॥

शितिकण्ठ! चिताधिरोहणे निधने भर्तुरहं समुद्यता ।
श्वसिमीह यदर्थमातुरा तममुं प्रापय मेऽन्तिकं सुतम् ॥१२॥

निमिषैरधुना युगायितं नयनाभ्यां जलदायितं विभो ।
जगदेतदतीव सुन्दरं ननु शून्यायितमेव मत्कृते ॥१३॥

दिवसे रविदीप्तिभास्वरे तम उच्चैः स्फुरतीह मत्पुरः ।
रजनीषु च तारकाग्रहाः पतदुल्का इव भान्ति निष्प्रभाः ॥१४॥

Scanned by CamScanner

न फलेष्वधुनाऽत्र माधुरी न च गन्धः कुसुमेषु मोहनः ।
दधिदुग्धरसः स सर्वथा भगवन्नस्तमितः शिवं विना ॥१५॥

सततं शिवहस्तलालितं सकलं धेनुकदम्बकं गृहे ।
स्रवदश्रुजलैरुदङ्मुखं नयनैर्हन्त तमेव वीक्षते ॥१६॥

हय एष शिवाजिरोहणैरनिशं तोषमवाप यो भृशम् ।
स हि तेन विनाकृतोऽधुना कृशिमाणं भजते दिने दिने ॥१७॥

शिवखड्गसुरक्षिता सदा जनतेयं विकलाऽखिला प्रभो ।
अधुना तददर्शनेन सा भगवन् म्लेच्छमताकुला भवेत् ॥१८॥

अमरेन्द्रपुरीमधिष्ठिता गमिता वाप्यमृतं परं पदम् ।
तनुजेन विनाकृता परं न हि माता सुखमेधते क्षणम् ॥१९॥

शिव शंकर विश्वनाथ हे हर गङ्गाधर चन्द्रशेखर ।
विलपामि यदर्थमाकुला तममुं प्रापय मेऽन्तिकं शिवम् " ॥२०॥

इत्थमार्तस्वरं नित्यं प्रार्थयन्तीं महेश्वरम् ।
पुत्रप्राणां जिजादेवीमपश्यन् दूनबान्धवाः ॥२२॥

अथोदिते शरत्काले नीरजस्क-नभस्तले ।
प्रवृद्ध-काश-धवले नव-नीरज-सुन्दरे ॥२३॥

नवरात्रोत्सवाध्मात-शंखध्वनि-निनादिते ।
काली-सरस्वती-लक्ष्मीपूजनव्यग्रधार्मिके ॥२४॥

कदाचन दिनेऽभ्येत्य दुर्गद्वाःस्थो हि कश्चन ।
सप्रणामं जिजां प्राह प्रस्फुरद्वामलोचनाम् ॥२५॥

" मातः काषायकौपीना जटालाः श्मश्रुलास्तथा ।
उत्तरापथतः प्राप्ता द्वारि केचन यात्रिकाः ॥२६॥

तेषु कश्चन तेजस्वी राजतेजोविराजितः ।
ब्रूते द्रष्टुं समीहेऽहं शीघ्रं देवीं जिजामिति ॥२७॥

निशम्य तद्वचः किञ्चिद् विमृश्यामील्य लोचने ।
तपस्विनः प्रवेश्यन्तामित्युवाच तपस्विनी ॥२९॥

ॐ नमः श्रीशिवायेति गर्जन्तस्ते मुहुर्मुहुः ।
जिजायाः सदनं प्राप्ता द्वारपालपुरस्सराः ॥३०॥

विरागिणस्तानातिथ्यैरपनीतपरिश्रमान् ।
अभिवादयितुं भक्त्या प्राप्ताऽसौ पुरतः सती ॥३१॥

यावदानम्य सा देहं मूर्ध्नां स्पृशति मेदिनीम् ।
तावत् साष्टाङ्गपातं तां प्राणमंस्ते तपस्विनः ॥३२॥

Scanned by CamScanner

निर्धूतयतिलक्षणः ।
तेषामग्रेसरः शीघ्रं निर्धूतयतिलक्षणः ।
मातर्मातरिति प्राह क्लिन्ननेत्रः सगद्गदम् ॥३३॥
तत्कालं तमभिज्ञाय ह्यविश्रान्तप्रतीक्षितम् ।
अन्तश्चरेभ्यः प्राणेभ्यः प्रेष्ठं पुत्रमुपागतम् ॥३४॥
माता सान्तरमान्तेन हर्षेणोत्फुल्ललोचना ।
आलिलिङ्ग चिराद् दृष्टं कौसल्येव रघूद्वहम् ॥३५॥
तं मातृपुत्रसंयोगं शब्दातीतं सुखास्पदम् ।
पश्यन्तोऽति जहर्षुस्ते समेताः शिवबान्धवाः ॥३६॥
शिवानुयात्रिकान् ज्ञात्वा त्यक्तकृत्रिमलक्षणान् ।
पप्रच्छ सा भयार्तेव क्व मे शम्भुरसाविति ॥३७॥
श्रुत्वैव तस्यास्तं प्रश्नं ते सर्वे मौनमाश्रिताः ।
लिलिखुश्चरणाङ्गुष्ठैर्भुवमानतमस्तकाः ॥३८॥
तांस्तथा सकलान् वीक्ष्य वात्याहतलतेव सा ।
प्रकम्पिततनुर्वृद्धा पपात धरणीतले ॥३९॥
पुनः प्रकृतिमापन्नामुपचारेण सत्वरम् ।
रहस्तां कथयाञ्चक्रे तद्रहस्यं शिवः स्वयम् ॥४०॥
स शिवागमनोदन्तो दुर्गाद् दुर्गं प्रवाहितः ।
अखण्डमुद्ध्वनन्तीभिः शतघ्नीभिः समन्ततः ॥४१॥
तं विज्ञाय सुखोदन्तमाबालजरठा जनाः ।
उन्मत्ता इव सानन्दं ननृतुर्जगुरुच्चकैः ॥४२॥
प्रज्वाल्य दीपिका लोकैश्चत्वरे मन्दिरे गृहे ।
अकाण्ड एव विहितो दीपावलिमहोत्सवः ॥४३॥
समर्पिता जिजादेव्या पुत्रलाभातिहृष्टया ।
शुचिव्रतेभ्यो विप्रेभ्यो भूयसीः स्वर्णदक्षिणाः ॥४४॥
भिक्षाचरेभ्यो धान्यानि कृपकेभ्यो धनानि च ।
मिष्टान्नानि च बालेभ्यो यतिभ्यः कम्बलानि च ॥४५॥
कल्पवल्लीव सर्वेभ्यः ददती सा यथेप्सितम् ।
निराचक्रे दरिद्राणां शोचनीयां दरिद्रताम् ॥४६॥
पतिव्रताभ्यो वासांसि सकुंकुमफलानि च ।
भार्याः समर्पयामासुः शिवराजस्य हर्षिताः ॥४७॥
अरम्भन्त सुखं गावश्चाकूर्दंस्तर्णका भृशम् ।
तुरङ्गमा अहेषन्त गजाः शुण्डा उदञ्चयन् ॥४८॥

मयूरा ननृतुश्चित्रं प्रोल्लसद्बर्हसुन्दराः ॥
अवसन्तेऽपि सानन्दमकूजन् मधुरं पिकाः ॥४९॥

तरवो लतिकाः सर्वा वर्षाकालेऽपि मूर्च्छिताः ।
दधुः प्रसूनपुष्पाणि शिवाभ्यागमनात् पुनः ॥५०॥

तस्मिन् बत शरत्काले देवता मन्दिरस्थिताः ।
सर्वर्तुपुष्पमालाभिरराजन्त सुमण्डिताः ॥५१॥

रामदासादयः सर्वे योगिनो धर्मपूरुषाः ।
शुभाशीर्वचनैर्दिव्यैः शिवाजिमसभाजयन् ॥५२॥

ततो यथोचिते काले मथुरायामवस्थितम् ।
गूढमानाययामास शिवः शम्भुं निजात्मजम् ॥५३॥

खिन्नः प्रयाणदिवसात् प्रभृति प्रभूतं
दिल्लीपतिः कुटिलनीतिजुषः शिवस्य ।
वृतान्तमेनमधिगम्य पुनश्चरोक्तं
लत्ताप्रहारमिव सोऽनुबभूव मूर्ध्नि ॥५४॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'मातृपुत्रसमागमो' नाम
५५ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५६ तमः सर्गः ॥

पुनरुत्थानम्

अथातो जयसिंहोऽसौ जिगीषुर्दक्षिणापथम् ।
शिवाभ्यागमवृत्तान्तमाकर्ण्यातिविसिस्मये ॥१॥
आत्मजो रामसिंहश्च स्वाधिकारादपाकृतः ।
दिल्लीन्द्रेणेति विज्ञाय सोऽभूद् भग्नमनोरथः ॥२॥
विजापुरप्रतीकारैर्भूयोभूयः पराहतः ।
प्रतिकूलग्रहग्रस्तं मेने स निजपौरुषम् ॥३॥
असौ नितान्तमुद्विग्नः प्रस्थितो दिशमुत्तराम् ।
तपतीतीरमायातः प्रयातः किल पञ्चताम् ॥४॥
ततश्च शिवराजेन स्वराज्यस्वास्थ्यकांक्षिणा ।
सन्ध्यर्थं देहलीन्द्राय प्रेषितं पत्रमुत्तमम् ॥५॥
"राजेन्द्र ! भवदातिथ्यं चिरायास्वाद्य पुष्कलम् ।
सहसाऽस्मि गृहं प्राप्तो मातृदर्शनलालसः ॥६॥
विप्रोषितस्य पुत्रस्य कस्य खल्वत्र भूतले ।
मातृप्रेमसमाकृष्टं चेतो न व्याकुलं भवेत् ? ॥७॥
तदहं व्याकुलो राजन् ! भवतोऽनुमतिं विना ।
सहसाऽत्र समायातः क्षमां केवलमर्थये ॥८॥
त्र्यम्बको रघुनाथश्च सुहृदौ ब्राह्मणौ मम ।
आगरायां विनिर्बद्धौ विमोच्यौ कृपया द्रुतम् ॥९॥
पूर्वं सन्धातुकामेन भवता यत् प्रतिश्रुतम् ।
पदं सेवाधिकारस्य मत्पुत्राय तदर्प्यताम् ॥१०॥
ये च केचिन्मदायत्ता दुर्गाः सह्याद्रिसंस्थिताः ।
ते नूनं भवदायत्ता दासोऽयं तत्र रक्षकः ॥११॥
यतिष्ये दक्षिणे देशे भवत्साम्राज्यवृद्धये ।
भवतोऽनुग्रहो भूयान् वर्धतां मयि सन्ततम्" ॥१२॥
शिवप्रहितमालोक्य पत्रमेतत् स भूपतिः ।
नितरां कुपितोऽप्यन्तः सन्धिमङ्गीचकार तम् ॥१३॥
दिल्लीपतिनिदेशेन शम्भुराजः शिवात्मजः ।
अधिकारपदं प्राप किशोरो राजपुत्रतः ॥१४॥
परिस्थितिप्रभावेण सर्वथैव नियन्त्रितः ।
तं सन्धिं पालयाञ्चक्रे दिल्लीन्द्रो वत्सरद्वयम् ॥१५॥

Scanned by CamScanner

प्रकृत्या कपटी क्रूरो देवद्रोही स किंप्रभुः ।
प्रावर्तत यथापूर्वं कर्तुं हिन्दुजनाहितम् ॥१६॥
आदिदेश स्वधर्मीयानमात्यान् क्रूरकर्मणः ।
श्रुतिस्मृतिपुराणोक्तं धर्मं विध्वंसितुं हठात् ॥१७॥
मन्दिरं विश्वनाथस्य काशीसंस्थं निपात्यताम् ।
प्रार्थनागारमास्माकं स्थाने तत्रैव रच्यताम् ॥१८॥
तत्रत्यमपरं भव्यं बिन्दुमाधव-मन्दिरम् ।
विध्वस्य तत्र चास्माकं जयस्तम्भोऽधिरोप्यताम् ॥१९॥
सौराष्ट्रे सोमनाथाख्यं यल्लिङ्गं विश्वविश्रुतम् ।
मन्दिरेण समं शीघ्रं यथापूर्वं प्रचूर्ण्यताम् ॥२०॥
उच्चैः केशवदेवस्य मथुरास्थं हि मन्दिरम् ।
झटिति द्रुघणाघातैर्निःशेषं विधीयताम् ॥२१॥
अद्यापि ह्यवशिष्टा स्युर्वेदशाला यदि क्वचित् ।
अध्याक्रम्य विनाश्यन्तां छात्रैरध्यापकैः समम् ।
ग्रन्था येऽस्मद्धर्ममतप्रतिकूला हि सर्वथा ।
ते दह्यन्तां सहैवान्यैः स्नानीयजलतप्तये ॥२३॥
परेषां सम्प्रदायानां गुरवो ये च केचन ।
अस्मद्धर्मविरुद्धास्ते प्रपीड्यन्तां यथेप्सितम् ॥२४॥
विधर्मीया यथा सर्वे दरिद्रत्वमवाप्नुयुः ।
नानाहेतुस्तथा तेषु करभारोऽधिरोप्यताम् ॥२५॥
ऊढा अनूढा विधवा काफिराणां कुलाङ्गनाः ।
विक्रेया वाऽपहर्तव्या स्वोपभोगाय सर्वथा ॥२६॥
चतुष्पथेषु तीर्थेषु मन्दिरेषु विशेषतः ।
गावः सवत्सा हन्यन्तां काफिराणां हि पश्यताम् ॥२७॥
यथाऽस्माभिः स नेताजिर्धर्मदीक्षां प्रदापितः ।
तद्वदन्येऽपि सर्वत्र प्रदाप्यन्तां हठादपि" ॥२८॥
इत्येताः किल राजाज्ञाः सर्वदिक्षु प्रसारिताः ।
महाप्रलयमेवोच्चैश्चक्रुर्हिन्दुभयावहम् ॥२९॥
दिने दिने हि दुःखार्तैः सज्जनैर्विनिवेदिताः ।
तीर्थमन्दिरविध्वंसवार्ताः शिवमपीपिडन् ॥३०॥
प्रत्यक्षप्रतिकारेऽसावसमर्थोऽपि वीर्यवान् ।
उपायं चिन्तयामास प्रतिशोधक्रियास्पदम् ॥३१॥
मन्दिराणां विनष्टाणां पुनरुत्थानसूचकम् ।
प्राचीनमन्दिरोद्धारं शिवाजिः समकल्पयत् ॥३२॥

Scanned by CamScanner

गोमन्तके नारिकेल-पनसाम्र-मनोहरे ।
शिवेन निर्मितं नूतनं सप्तकोटीशमन्दिरम् ॥३३॥
सप्तकोटीशलिङ्गं यत् साक्षात् कृष्णेन पूजितम् ।
कादम्बकुलजैर्वीरैः श्रद्धया पर्युपासितम् ॥३४॥
ततश्चानादृतं म्लेच्छैर्देवविग्रहभञ्जकैः ।
तदेव शिवराजेन सम्प्रतिष्ठाप्य पूजितम् ॥३५॥
देवमूर्तिद्रुहस्तस्य पाप्मनो देहलीपतेः ।
सप्तकोटीश्वरोत्थानं प्रत्युत्तरमिवाभवत् ॥३६॥
ततश्च सन्धिविच्छेदप्रवृत्ते देहलीपतौ ।
शिवो हि राजनीतिज्ञः शठे शाठ्यमचिन्तयत् ॥३७॥
प्रवीरान् सुहृदोऽमात्यान् सङ्ग्रामेषु यशस्विनः ।
समाहूय स तेजस्वी बभाषे स्वमनीषितम् ॥३८॥
"बान्धवा राज्यमस्माभिर्यदाबाल्यादुपार्जितम् ।
रक्षितं वर्धितं सम्यक् प्रत्यहं समरोद्यमैः ॥३९॥
फत्तेखानोऽफझुल्लश्च शास्ताखानस्तथाऽपरे ।
ये तन्नाशार्थमायातास्तेऽस्माभिर्दण्डिता रणे ॥४०॥
महत्यो रिपुसेनास्ताः गजोष्ट्रहयदुर्जयाः ।
पादातैरेव नो वीरैर्विनायासं पराहताः ॥४१॥
पर्णालदुर्गे रुद्धोऽहं तथा दिल्लीशबन्धने ।
अविघ्नं बहिरायातो भगवत्कृपया खलु ॥४२॥
सेनासम्पद् विहीनानामप्यस्माकं सदा जयः ।
व्यनक्त्यनुग्रहं नूनं महादेवस्य सर्वथा ॥४३॥
प्रायेण देवो भक्तानां तदनुग्रहकांक्षिणाम् ।
आकस्मिकैर्विपत्पातैर्मनाक् धैर्यं परीक्षते ॥४४॥
जयसिंहाक्रमापत्त्या वयं नूनं परीक्षिताः ।
सत्पक्षपातिनेशेन पुनर्भाग्यं प्रदित्सुना ॥४५॥
तदाक्रमणमस्माभिः सोढं वैतसवृत्तिभिः ।
प्रशान्तोऽद्य महापूरः स्थिताः स्मश्च निरापदः ॥४६॥
सन्धिहेतोः प्रदत्ता ये गिरिदुर्गा अरातये ।
त्रयोविंशतिसंख्याकांस्तान् पुनर्जेतुमुत्सहे ॥४७॥
दुर्गमूलं स्थिरं राज्यं स्थिरे राज्ये सुसम्पदः ।
सम्पन्मूलः सदाचारः सदाचारोद्भवं सुखम् ॥४८॥
नूनं दुर्गापहारेण सर्वस्वं नोऽरिणा हृतम् ।
सत्वराक्रमणैर्दुर्गानतस्तान् जेतुमुत्सहे ॥४९॥

Scanned by CamScanner

विजित्य शिल्पसंस्कारैर्मया पूर्वं नवीकृताः ।
आह्वयन्तीव मां दुर्गास्ते सह्यशिखरस्थिताः ॥५०॥
लुप्तप्राय स्वराज्यं नो ह्यापत्कालीनसन्धिना ।
अविश्रान्तरणैर्घोरैर्विजेतव्यमतः परम् ॥५१॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा यवनास्तथा ।
भवन्तु शस्त्रसन्नद्धाः स्वराज्यरणहेतवे ॥५२॥
दुर्गे दुर्गे पराक्रम्य ग्रामे ग्रामे पुरे पुरे ।
शत्रुध्वजा विनिष्कास्याः पारतन्त्र्यनिदर्शकाः ॥५३॥
विजापुरीया मुघलास्ते कालयवनाः खलाः ।
पुर्तुगीझास्तथाङ्ग्लाश्च सर्वेऽप्यस्मदरातयः ॥५४॥
पृथक् पृथक् ते जेतव्याः किं वा सङ्घटिता अपि ।
स्वराज्योत्थापनं शक्यं न विनारातिमर्दनम् ॥५५॥
एकाकिनापि रामेण दण्डकारण्यचारिणा ।
चतुर्दशसहस्राणि हतानि किल रक्षसाम् ॥५६॥
हनूमान् स बतैकाकी रामकार्यार्थमुद्यतः ।
निर्बद्धोऽप्यदहत् सर्वां राक्षसेन्द्रपुरीं किल ॥५७॥
एकाकिनैव कृष्णेन बाल्येऽप्यात्मबलेन हि ।
सिंहासनादवाकृष्टः कंसः स मथुराधिपः ॥५८॥
अभिमन्युः किलैकाकी चक्रव्यूहं दुराक्रमम् ।
निजप्राणार्पणेनापि बिभेद समराङ्गणे ॥५९॥
कीचकानां कुरूणां च भ्रातृणां शतमुन्मदम् ।
एकाकिनैव भीमेन लीलया किल मर्दितम् ॥६०॥
प्रतापसिंहेनैकेनाप्यसहायेन सर्वथा ।
सम्राजोऽकबरस्यापि साम्राज्यं किल धिक्कृतम् ॥६१॥
प्रायेणान्यायिनामेव महीयान् सैन्यसञ्चयः ।
रामायणे भारते च दृश्यते तन्निदर्शनम् ॥६२॥
तदुत्तिष्ठत हे वीरा बान्धवाः सङ्गरोद्यताः ।
प्रयुध्यध्वं प्रयुध्यध्वं विजयध्वं च संततम् ॥६३॥
स्वातन्त्र्ययुद्ध-परमोग्र-महाव्रतस्य
वीरोत्तमस्य रिपुनिर्दमनोत्सुकस्य ।
आकर्ण्य वाचमिति दीप्ततमां शिवस्य
युद्धोद्यताः समभवन् सुहृदः समस्ताः ॥६४॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'पुनरुत्थानं' नाम ५६ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५७ तमः सर्गः ॥

सिंहगडविजयः

अथ स्वराज्यं रिपुणा निगीर्णं स्वर्भानुनेवामृतरश्मिबिम्बम् ।
कर्तुं विमुक्तं नितरां सचिन्तः शिवः पुरस्तात् स्वसखं ददर्श ॥१॥
तान्हाजिनामानममुं सखायं सभाजयित्वा विविधोपचारैः ।
प्रेम्णा निजार्धासनगं विधाय प्रमोदमग्नः स उवाच वाचम् ॥२॥
"सम्बन्धिनो मे शतशः सहायाः सहस्रशः सन्ति तथा सखायः ।
त्वद्दर्शनादेव सखे परन्तु फुल्लाम्बुजत्वं भजते मनो मे ॥३॥
बाल्यात् प्रभृत्येव सखे सहायस्त्वं सर्वदासीर्मम युद्धकार्ये ।
अन्यत्र कार्ये सुलभा अनेके युद्धे सहायस्तु निसर्गवीरः ॥४॥
यन्मद्यशः किञ्चन भूतलेऽस्मिन् मित्र प्रसृप्तं विजयैरनेकैः ।
तद् वस्तुतस्त्वत्करवालतेजःप्रभाव एवेति सदैव मन्ये ॥५॥
रणाङ्गणे त्वत्करवालधारागाढ-प्रहारैः खलु पृष्ठदेशे ।
व्रणाङ्किता दौहृदवीरवर्याः स्वप्नेऽपि ही बिभ्यति दर्शनात् ते ॥६॥
यत् पाञ्चजन्ये किल देवदत्ते पौण्ड्रे सुघोषे मणिपुष्पके वा ।
उद्ध्वानगाम्भीर्यमभूत् तदत्रैकत्र श्रुतं ते रणगर्जनासु ॥७॥
त्वयैकवीरेण रणाग्रगेण रिपुप्रवाहातिनिरोधकेन ।
द्विबाहुना चापि मयानुभूना नूनं सहस्रार्जुनता रणेषु ॥८॥
पिताऽत्र लोके खलु जन्मदाता पुत्रः परेतस्य च पिण्डदाता ।
भ्राता हि दायाद इति प्रसिद्धो मित्रं तु पात्रं सुखसम्मदानाम् ॥९॥
तद् दर्शनेनैव तवाद्य नूनं मनो मदीयं नितरां प्रसन्नम् ।
विज्ञातुमिच्छामि पुनस्तथापि सखे तवाभ्यागमनस्य हेतुम् ॥१०॥
इत्युक्तवन्तं सुहृदं शिवाजिं वीराग्रगण्यं महतां वरेण्यम् ।
प्रादर्शयच्चाक्षतपूर्णपात्रं तान्हाजिरत्यानतपूर्वकायः ॥११॥
जगाद चैनं स्मितफुल्लवक्त्रं स वीरवर्यो विकसन्मुखश्रीः ।
स्वीकार्यमेतन्नरदेव ! पूगाक्षतं सुतोद्वाहनिमित्तकं मे ॥१२॥
अवश्यमभ्येत्य हि दारपुत्र-मित्रादिभिर्देव ! गृहं मदीयम् ।
स्वपादसंसर्गपवित्रधूलीस्पर्शेण तत् पावनतां हि नेयम् ॥१३॥
इति ब्रुवाणे नरवीरधुर्ये प्राणप्रिये मित्रवरे शिवस्य ।
नितान्तचिन्ताकुलनेत्रवक्त्रा माता जिजा तत्र समाजगाम ॥१४॥

Scanned by CamScanner

तान्यामुभाभ्यां विहितप्रणामाऽप्यभाषमाणा निभृतोपविष्टा ।
गवाक्षतो निर्निमिषेक्षणाऽसौ पुरःस्थितं सिंहगडं ददर्श ॥१५॥
तां तादृशीं वीक्ष्य विदूनचित्तां चिन्ताकुलां स्वां जननीमिवान्याम् ।
पप्रच्छ तान्हाजिरुदूढखेदो मातः कुतः का खलु दुर्व्यथा ते ॥१६॥
त्वं जन्मदात्री नियतं शिवस्य चैतन्यदात्री खलु मादृशस्य ।
त्वत्काङ्क्षितं पूरयितुं मदन्तश्चैतन्यमभ्युत्स्फुरतीव दीप्तम् ॥१७॥
यावन्न मातस्तव सन्मनीषां सम्पूरयामि प्रतताधिहेतुम् ।
माघे नवम्यां वदि निश्चितोऽपि पुत्रस्य बाढं स्थगितो विवाहः ॥१८॥
म्लेच्छध्वजः सिंहगडे स्थितोऽयं शूलायते चेत् तव लोचनान्तः ।
प्राणव्ययेनाप्यचिरेण तत्र कुर्यां प्रतिष्ठां भगवद्ध्वजस्य ॥१९॥
इत्यात्मभावं स्फुटमुद्गिरन्तं तं वीक्षमाणा परमादरेण ।
अभाषमाणैव ददौ च तस्मै रत्नत्सरुं खड्गमुदीर्णधारम् ॥२०॥
आदाय वीरोचितमेकवीरः प्रसादचिह्नं तदनन्यलभ्यम् ।
जगाद जाने जननि त्वदीयं मनोगतं काङ्क्षितमद्य नूनम् ॥२१॥
इतः प्रयास्याम्यविलम्बमेव मनीषितं साधयितुं तवाम्ब ।
पश्चाद् विवाहो मम पुत्रकस्य भूयाच्च साकं विजयोत्सवेन ॥२२॥
उक्त्वेति तां पूज्यतमां प्रणम्य सस्नेहमाश्लिष्य च मित्रवर्यम् ।
शुभाशिषो मूर्ध्नि दधत् तदीया युद्धोत्सुकोऽसौ त्वरितं प्रतस्थे ॥२३॥
अथ प्रयाते नरसिंहवीर्ये सुहृद्वरे सिंहगडं विजेतुम् ।
न्यमन्त्रयत् स्वान् रणकर्मधुर्यान् सङ्ग्रामसत्राय शिवो युयुत्सुः ॥२४॥
अलङ्घ्यमादेशमवाप्य तस्य चिरादयुद्धेन नितान्तखिन्नाः ।
प्रतापरावप्रमुखाः प्रवीराः सेनाधुरीणाः शिवमभ्युपेयुः ॥२५॥
कृतप्रणामान् विविधोपचारान् अकृत्रिमप्रेमजुषः स्वबन्धून् ।
पृष्ट्वाऽथ कौटुम्बिकवार्तजातं स तानवादीन् मित-तथ्यवादी ॥२६॥
सुहृद्वराः सन्ततसङ्गरेण यदर्जितं किञ्चिदिह स्वराज्यम् ।
तदद्य दिल्लीपतिनाधमेन ग्राहेण सद्रत्नमिवावगीर्णम् ॥२७॥
तृणमप्यवाप्यम् ।
रणं विना जातु न भूतलेऽस्मिन् रिपोः सकाशात् तृणमप्यवाप्यम् ।
औरङ्गजेबासुरसम्प्रगीर्णं जेतुं स्वराज्यं शरणं रणं नः ॥२८॥
स्वातन्त्र्यलक्ष्मीः कुलदेवता नो बद्धेव पाशैर्यवनाधिपेन ।
तन्मुक्तयेऽस्माभिरनन्यभक्तैः प्रवर्त्यतां संगरसत्रमेव ॥२९॥
साम्ना सुदाम्नेव बलेन हीनो दानप्रयोगेण धनेन हीनः ।
हीनो विवेकेन च भेदनीत्या प्रायेण शत्रुर्वशमेति लोके ॥३०॥

पुनर्वैश्रवणोपमेयः ।
बलैः षडङ्गैः सुतरामुपेतो धनैः
सम्प्रत्यसाध्यः खलु भेदनीत्या दिल्लीश्वरोऽस्माभिरसौ विजेयः ॥३१॥
ग्रामेषु खेटेषु च पत्तनेषु दुर्गेषु चाम्भोधिगिरिस्थितेषु ।
आकस्मिकैराक्रमणैररीणाम् अभूतपूर्वः प्रलयो विधेयः ॥३२॥
अजय्यमप्येनमवश्यजेयं दुर्गोत्तमं सिंहगडं विजेतुम् ।
अल्पीयसा सैन्यगणेन साकं तान्हाजिरभ्युद्गत एव वीरः ॥३३॥
ज्ञातुं तदीयां विजयप्रवृत्तिं नितान्तमेवास्मि समुत्सुकोऽहम् ।
अद्यैव वा श्वोऽथ निशीथकाले ज्योतिर्जयद्योति विलोकयिष्ये ॥३४॥
ततश्च सर्वैररुणोदयात् प्राग् गाढान्धकारे विजयाक्षराणि ।
नूनं लिखन्ती स्वकरैर्विलोलैः ज्वालावली सिंहगडे व्यलोकि ॥३५॥
ततोऽचिरेणैव जयप्रसादं खुरोत्थितैर्धूसरयन् रजोभिः ।
तुरङ्गसादी त्वरमाण उच्चै रणाङ्गणाद् राजगडं प्रपेदे ॥३६॥
म्लानाननोऽसौ गलदश्रुधारो बाष्पोद्गमारुद्ध-वचःप्रवृत्तिः ।
निवेदयिष्यन् समरप्रवृत्तिं सगद्गदं वाचमुवाच दूतः ॥३७॥
"स्वामिन् निशीथे सुघनान्धकारे नियुध्यमानो रिपुणा सखा ते ।
खड्गप्रहारेण निकृत्तबाहुर्हा हा हतो देवभुवं जगाम ॥३८॥
किं वर्णये वीरकथां तदीयाम् अत्यद्भुतां देव! पुरस्तवाहम् ।
यां वर्णयत्वादिकविर्महात्मा किं वा महाभारतकाव्यकर्ता ॥३९॥
तथापि वृत्तान्तमभूतपूर्वं संक्षेपतस्त्वत्पुरतो ब्रवीमि ।
हतावशिष्टस्य हि सैनिकस्य हा धिग् धिगेतद् हतभागधेयम् ॥४०॥
यदा प्रभृत्येव स तं सुदुर्गं जेतुं महात्मा कृतनिश्चयोऽभूत् ।
दिवाऽथ नक्तं परितो वनान्तं बभ्राम सूक्ष्मेक्षिकयाऽभिपश्यन् ॥४१॥
माघे नवम्यां वदि रात्रिकाले शैत्यान्धकाराहतसर्वलोके ।
वनेचरैर्वीरगणैः स्वकीयैः गूढाध्वनाऽसौ सहसा प्रतस्थे ॥४२॥
भ्राता कनीयान् नरदेव ! तस्य सूर्याजिनामा तमनुप्रयातः ।
वयोऽतिवृद्धोऽपि हि मातुलोऽसौ शेलारनामा पुरतश्चचाल ॥४३॥
प्राप्तः प्रतीच्यां तदुपत्यकां स साष्टाङ्गपातं सहसा प्रणम्य ।
सम्प्रार्थयामास च गाढभक्त्या वज्राङ्गवीरं रघुनाथदूतम् ॥४४॥
"श्रीरामकार्यं कुरुते सखा मे प्रभो! शिवाजिः परिपूतशीलः ।
तदेकनिष्ठाय रणाङ्गणेऽत्र प्रदेहि शीघ्रं जयमङ्गलं मे ॥४५॥
कोदण्डपाणे रघुवीर राम! रथाङ्गपाणे भगवन् मुरारे ।
खट्वाङ्गपाणे जगदीश शम्भो! प्रदेहि तूर्णं जयमङ्गलं मे ॥४६॥
हे विश्वमातस्तुलजे भवानि ! देह्याशिषं मे समरोद्यताय ।
ऋते कृपाया जगदम्बिके ! ते न लभ्यते जातु रणे जयश्रीः ॥४७॥

प्रार्थ्येति देवानतिगाढभक्त्या स्वां गोधिकां रज्जुनिबद्धकायाम् ।
स प्रेरयामास घनान्धकारे गिरेस्तटं तुङ्गमधिप्रयातुम् ॥४८॥
सा शीघ्रमारुह्य गिरिं नखाग्रैः पाषाणखण्डं सुदृढं दधार ।
तत्कायबद्धं घनदीर्घरज्जुमालम्ब्य तान्हाजिरुदारुरोह ॥४९॥
तमन्वगाद् वीरचमूः समग्रा निःशब्दमालम्ब्य तमेकपाशम् ।
आकृष्यमाणा जयकाङ्क्षयेव नितान्तमन्तर्मुहुरुच्छलन्त्या ॥५०॥
दुर्गाधिरूढा सकला चमूः सा गाढान्धकारेऽतितुषारकाले ।
यं यं पुरोऽपश्यदरातिपक्ष्यं तं तं जघानैव निमेषमात्रात् ॥५१॥
आरक्षका अर्धसुषुप्तिमग्नाः प्रगाढसुप्ता अथ जागरूकाः ।
आकस्मिकैर्दुर्धरखड्गपातैर्विच्छिन्नशीर्षाः परलोकमीयुः ॥५२॥
आक्रन्दनैरर्धमृतारिवीरोद्गीर्णैरकस्मादितरे प्रसुप्ताः ।
विध्वस्तनिद्राः सहसाभ्यपश्यन् कृतान्तदूतानिव चण्डवेगान् ॥५३॥
अल्पेन कालेन हि शात्रवीयाः सर्वेऽपि योधा धृतभल्लखड्गाः ।
आस्माकवीरैः सममन्धकारे घनाघनं सङ्गरमारभन्त ॥५४॥
भानूत्तरोऽसावुदयाभिधानो तद्दुर्गपालो रणकर्ममल्लः ।
पदे पदेऽस्माकमुदग्रशस्त्रान् वीराननेकान् बहुशो जघान ॥५५॥
तथाविधं तं रिपुपक्षधुर्यं विलोक्य दूरादपि वीरवर्यः ।
प्रडीनसंडीनगतिः सवेगं हन्तुं सखा ते सहसा चुकूर्द ॥५६॥

युग्मकम्—

प्रक्षुब्धशार्दूलसदृक्षवीर्यौ तरस्विनौ खड्नियुद्धविज्ञौ ।
तडिल्लताभं स्वमुदग्रखड्गं परस्परस्योपरि पातयन्तौ ॥५७॥
स्ववैरिणं घातयितुं बलाढ्यम् अन्योन्यमारात् प्रतिसारयन्तौ ।
तौ शोणितक्लिन्नसमस्तगात्रौ न्ययुध्यतां भूरि सुदीर्घकालम् ॥५८॥
सख्युः प्रहारैस्तव देव ! घोरैः स शत्रुधुर्यः प्रतिसार्यमाणः ।
भयाभिभूतस्तनुरक्षणाय प्राभ्रामयद् दीर्घदृढं स्वखड्गम् ॥५९॥
तदैव दैवेन सुनिष्ठुरेण ह्यरातिखड्गाश्रयिणेव हन्त ।
दृढाभिघातान् बहुशो निरुन्धत् संत्राणचर्माद्बिभिदे तदीयम् ॥६०॥
अन्यत् तदानीमनवाप्य चर्म सुदुर्धरे प्राणहरे नियुद्धे ।
हस्तावनद्धेन चकार शीघ्रम् उष्णीशपट्टेन शरीरगुप्तिम् ॥६१॥
तां तादृशीं तस्य दशामवेक्ष्य स लब्धधैर्यो रिपुपक्षधुर्यः ।
खड्गाभिघातैरनिरुध्यमानैर्विच्छिन्नवान् वामभुजं तदीयम् ॥६२॥
स छिन्नबाहूच्छलदस्रधारोऽप्यन्येन हस्तेन नियुध्यमानः ।
निपात्य शत्रुं प्रखरप्रहारैः पपात भूमौ स्वजनाश्रुवर्षैः ॥६३॥

Scanned by CamScanner

विज्ञाय तान्हाजिमपेतजीवं चमूस्तदीयाहतधैर्यबन्धा ।
दिशं प्रतीचीं प्रति भूरिभीत्या पलायितुं प्राक्रमतातिशीघ्रम् ॥६४॥
वीरान् विकीर्णानभिवीक्ष्य सर्वान् सूर्याजिरुत्क्षोभकषायनेत्रः ।
उदीर्णखड्गः प्रतिवर्तयंस्तान् जगर्ज निर्भर्त्सितसिंहनादः ॥६५॥
भो बान्धवाः ! निस्तुलसिंहवीर्याः क्व याथ वेगेन पलायमानाः ?
आलम्ब्य यं रज्जुमिहाधिरूढाः कृत्तः समूलं स मयाधुनैव ॥६६॥
सेनापतेस्तस्य विहाय देहं शत्रुप्रहाराभिहतं धरण्याम् ।
पलायमानाननुयायिनो वो विज्ञाय षण्ढा अपि ते हसेयुः ॥६७॥
संयुध्यमाना यदि ते म्रियन्ते जीवन्ति किं ते प्रपलायमानाः ।
विगृह्णतां शत्रुभिरद्य नूनं श्रेयस्करं स्यान्मरणं रणे वः ॥६८॥
विजेतुमेनं खलु सिंहदुर्गं प्राप्ताः स्म एते वयमद्य नूनम् ।
अपास्य कातर्यमतो जघन्यं युध्यध्वमुच्चैस्तरसा जयार्थम् ॥६९॥
तत् तस्य वीरस्य वचो निशम्य प्रोद्दीपयद् वीररसं हृदन्तः ।
आस्माकवीरैः समरप्रवृत्तैः निहत्य शत्रून् जित एव दुर्गः ॥७०॥
दूतोदितं संगरवृत्तमेतदाकर्णयन् शोकमहाब्धिमग्नः ।
समुच्छलद्-गद्गदिकावरुद्ध-वचःप्रवृत्तिः शिवराज आसीत् ॥७१॥
निमील्य नेत्रे स्रवदश्रुपूरे ध्यायन् प्रियं तं सुहृदं हृदन्तः ।
जगाद मन्दं सहसा शिवाजिः जितस्त्वया सिंह ! स सिंहदुर्गः ॥७२॥
सुदुर्जयं शत्रुगणैरगण्यैः स्वराज्यसंरक्षण-शक्तसारम् ।
सचेतनं त्वां प्रविहाय दुर्गं लब्धो मया पार्थिव एव दुर्गः" ॥७३॥
स्वर्यातस्य सुहृद्वरस्य परमप्रेष्ठस्य तस्यान्तिमं
कर्तुं वीरवरोचितं सविधि सत्कारं हि शास्त्रोदितम् ।
दूनान्तःकरणस्तदैव निरयात् तं सिंहदुर्गं शिवो
निध्यायन् हृदि तस्य हार्दमतुलं स्वस्मिंश्च तस्मिन् स्वकम् ॥७४॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'सिंहगडविजयो' नाम
५७ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५८ तमः सर्गः ॥

स्वराज्यविमोचनम्

अथ सिंहगडं लब्ध्वा सुहृत्प्राणैरुपार्जितम् ।
म्लेच्छाक्रान्तं पुनर्जेतुं स्वराज्यं शिव उद्यतः ॥१॥
मोरोपन्तो निळोपन्तः सर्जेरावो रणोत्सुकः ।
प्रतापरावो हंसाजिः सूर्याजिश्च महाबली ॥२॥
आनन्दरावो व्यंकाजी रूपाजी रिपुमर्दनः ।
अनाजिश्च विठोजिश्च येसाजिः संगरप्रियः ॥३॥
अन्येऽपि बहवो वीराः सेनाधुर्याः शिवानुगाः ।
स्वां स्वां चमूं सहादाय विजयार्थं प्रतस्थिरे ॥४॥
अश्वानीकान्यनेकानि पत्तिसैन्यानि कानिचित् ।
शिवाज्ञामनु निर्जग्मुर्दिक्षु सर्वासु सत्वरम् ॥५॥
तदश्वखुरसम्पातैः रजःस्तोमः समुत्थितः ।
म्लेच्छाधिपानां सर्वेषां विश्रान्तः खलु मूर्धसु ॥६॥
तेषां विजयमानां भीषणा-रणघोषणाः ।
म्लेच्छाधिपानां मत्तानां निद्रासुखमपाहरन् ॥७॥
प्रत्यहं विजयोदन्तास्तेषां विजयशालिनाम् ।
म्लेच्छाधिपानां क्रूराणां हृन्मर्माणि व्यदारयन् ॥८॥
जयसिंहेन वीरेण पुराक्राम्यन्त ये हठात् ।
दुर्गास्ते लीलया सर्वे शिवानीकैर्विजिग्यिरे ॥९॥
यत्र यत्र ययुर्वीराः संग्रामार्थं शिवाज्ञया ।
जयश्रियैव ते नूनं तत्र तत्राभिनन्दिताः ॥१०॥
तेषां हि विजयिष्णूनां सर्वतो वशमागता ।
स्वर्णरत्नमयी लक्ष्मीर्म्लेच्छाकोषेषु कुण्ठिता ॥११॥
पूर्वं शिवेन दुग्धापि नगरी सूरताभिधा ।
पुनश्च प्रेरयामास स्वर्णदोहाय तं ध्रुवम् ॥१२॥
दिल्लीन्द्रेण धनं पूर्वं यन्महाराष्ट्रतो हृतम् ।
नूनं प्रत्यर्पयामास शिवराजाय पूरसो ॥१३॥
कारञ्जाख्यं पुरं भव्यं काञ्चनागारमुत्तमम् ।
शिवसैन्यप्रतापेन निष्काञ्चनमिवाभवत् ॥१४॥

Scanned by CamScanner

बुहलोलो बृहद्वीर्यो दिलेरोऽत्यन्तविक्रमी ।
खवास-दावुदावुग्रौ धनलुब्धो बहादुरः ॥१५॥
इख्लासश्च महासेनो भोगासक्तो महाबतः ।
खानोपाधिभृतः सर्वे शिवानीकैः पराहताः ॥१६॥
सोम-विक्रम-शाहौ तौ जसवंतः स विक्रमी ।
पलायांचक्रिरे भीत्या प्राणत्राणाय कुत्रचित् ॥१७॥
पुर्तुगीझा वलंदेजा धूर्ता आङ्ग्लाः फरांशिसाः ।
शिवशौर्यमहापूरेऽभूवन् वैतसवृत्तयः ॥१८॥
तमधृष्यमहावीर्यं प्रतिरोद्धुं कथञ्चन ।
दिल्लीन्द्रेण दिलेराख्यः सेनानीः समदिश्यत ॥१९॥
स स्वशौर्यमदोन्मत्तश्चतुरङ्गबलान्वितः ।
मूलातीरमनुप्राप्य चक्रे वेतालताण्डवम् ॥२०॥
ग्रामे ग्रामे शिशून् बालान् वृद्धांश्चापि स दुर्मदः ।
प्रसह्य घातयामास हारयामास च स्त्रियः ॥२१॥
रणनीतिसुविज्ञेन शिवेन प्रहितस्तदा ।
मोरोपन्तः प्रतापश्च साल्हेराक्रमणाय च ॥२२॥
तावुभौ बलमादाय प्रबलं समरोत्सुकम् ।
दक्षिणोत्तरतो दुर्गं तमाचक्रमतुर्बलात् ॥२३॥
घोरमास्कन्दनं तत्र कृतं शिवबलैस्तथा ।
अविच्छिन्नवपुर्नासीद् रिपूणां कोऽपि सैनिकः ॥२४॥
शस्त्राघात-समुद्भूत-स्फुलिङ्गाभासु वीक्षितम् ।
प्रस्रवद्रुधिरक्लिन्नं तत्र वीरै रणाजिरम् ॥२५॥
मतङ्गजा हया उष्ट्रा वृषभाश्च सहस्रशः ।
शत्रुसेना-विनिःसृष्टा गृहीताः शिवसैनिकैः ॥२६॥
इख्लासप्रमुखाः सर्वे शत्रुसेनाधुरन्धराः ।
बन्दिग्राहं गृहीतास्ते शिववीरै रणाङ्गणे ॥२७॥
सूर्यरावाभिधो वीरः सूर्यतुल्यप्रतापवान् ।
वयस्यः शिवराजस्य रणे तत्र दिवं गतः ॥२८॥
तां शोकवार्तामाकर्ण्य साकं विजयवार्तया ।
शोकहर्षाकुलस्वान्तः शिवराजोऽभवत् तदा ॥२९॥
वीरान् स तोषयामास सर्वान् विजयहर्षितान् ।
सौवर्णैः कटकैर्हारैः कुण्डलैरङ्गुलीयकैः ॥३०॥

Scanned by CamScanner

मुल्हेराख्योऽपरो दुर्गः साल्हेरान्तिकसंस्थितः ।
तदानीं शिवसैन्येन जितः सङ्गरलीलया ॥३१

गोदातीरस्थितं पुण्यक्षेत्रं तन्नासिकाभिधम् ।
पारतन्त्र्य-विनिर्मुक्तं कृतं शिवबलैर्हठात् ॥३२॥

इत्येवं विजयोदन्ता शिवसैन्यस्य सर्वतः ।
अहर्दिवं निशम्यैव दिलेरोऽभूद् भयाकुलः ॥३३॥

वार्ता अरुन्तुदा एता श्रावं श्रावं दिने दिने ।
चिन्ताग्रस्त-सुखानन्दोऽभवद् दिल्लीमहीपतिः ॥३४॥

स बहादुरमुद्दिश्य पत्रमेकमलेखयत् ।
ववाम यस्मिन्नन्तःस्थं क्रोधं हालाहलोपमम् ॥३५॥

"मूढाः पौरुषहीनेन किं वृथा जीवितेन वः ।
किं न क्वचन संग्रामे प्रयाता गृध्रभक्ष्यताम् ॥३६॥

पश्यतामेव युष्माकं सेनासम्पज्जुषामपि ।
वन्यः स रिपुरस्माकं साम्राज्यं ग्रसतेऽन्वहम् ॥३७॥

चराचरजगन्नाथः स्वयमेव स ईश्वरः ।
अस्मत्साम्राज्यविध्वंसं किन्नु देशेऽत्र वाञ्छति ॥३८॥

किं नु नास्त्येव साम्राज्ये सेनानीः कोऽपि वीर्यवान् ।
पराजयेत यः शक्त्या वन्यं तं रिपुमुन्मदम् ॥३९॥

अन्तर्वैरं परित्यज्य संसाध्य दृढसंहतिम् ।
कुतो न तं रिपुं वन्यं विघातयत सर्वथा" ॥४०॥

प्रत्युत्तरात्मकं पत्रमसावपि बहादुरः ।
सम्राजे प्रेषयामास मर्मच्छेदाय केवलम् ॥४१॥

"राजराजेन्द्र ! वन्यं तं रिपुं ते वनवह्निवत् ।
निर्वापयितुमिच्छामो नितान्तं शस्त्रवर्षणैः ॥४२॥

राजधान्यां पुरा रुद्धः स्वयमेव त्वया रिपुः ।
निर्विघ्नं बहिरायातः स कथं तव बन्धनात् ॥४३॥

यमप्रमेयसामर्थ्यः साक्षात् त्वमपि भूपते ।
निरोद्धुमसमर्थोऽभूः कोऽन्यस्तं रोद्धुमर्हति ? ॥४४॥

युग्मकम् —

विजापुरीयमस्माकं सिद्दीनां कुतुबस्य च ।
फरेञ्चाङ्ग्ल-पुर्तुगीझानां सर्वेषां संहतं बलम् ॥४५॥

Scanned by CamScanner

साम्प्रतं सर्वथोत्थाय विगृह्णीत शिवेन चेत् ।
नैव जातु जयं विन्देदिति मे निश्चितं मतम् ॥४६॥

तदिदानीमजय्येन वन्येन रिपुणा सह ।
सन्धिरेव हिताय स्यादिति मे सुदृढं मतम्" ॥४७॥

तत् तस्य मतमालोच्य दुःसहं वाहिनीपतः ।
दिल्लीपतिः स कोपेन प्रजज्वालेव चेतसि ॥४८॥

अथैतस्मिन्नवसरे गोलकोण्ड-नराधिपः ।
कुतुबाख्यः शिवारातिः पञ्चतामगमत् किल ॥४९॥

तदाधिपत्यं सम्प्राप तानाशाहाभिधस्तदा ।
जामाता पूर्वराजस्य दैवयोगेन केवलम् ॥५०॥

करदीकृतभूपालः सर्वत्र विजयी शिवः ।
आदिदेश यथापूर्वं करदानाय तं नृपम् ॥५१॥

दुरुल्लङ्घ्यां शिवाज्ञां तां मूर्ध्नां समभिनन्द्य सः ।
यथादिष्टं करद्रव्यं प्राहिणोदतिसत्वरम् ॥५२॥

बहवोऽन्येऽपि भूपालास्तदादेश-वशंवदाः ।
करैः सम्प्रीणयामासुः शिवं दुर्धरविक्रमम् ॥५३॥

कररूपेण सम्प्राप्तैः प्रभूतैः स्वर्णवर्षणैः ।
चक्रे लक्ष्मीः प्रसन्नेव शिवराजाभिषेचनम् ॥५४॥

इत्थं निगीर्णमरिभिः सकलं स्वराज्यं
संवत्सरैस्त्रिभिरखण्डितयुद्धसत्रैः ।
जित्वा रिपून् प्रतिपदं परितः प्रसह्य
दुर्दास्यमुक्तमकरोद् प्रबलः शिवाजिः ॥५५॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'स्वराज्यविमोचनं' नाम
५८ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ५९ तमः सर्गः ॥

छत्रसालप्रबोधनम्

इत्थं दुर्दान्त-यवननृप-मर्दनसम्भवम् ।
यशो व्याप दिशः सर्वाः शिवस्य हृदयंगमम् ॥१॥

तत्राश्चर्यकथा रम्या वीररौद्ररसोज्ज्वलाः ।
यूनां प्रदीप्तवीर्याणां चेतांसि समदीपयन् ॥२॥

दूरदेशस्थिताः केचिद् युवानः साहसप्रियाः ।
बभूवुरन्तरत्यन्तं शिवदर्शनलालसाः ॥३॥

अनालोकितपूर्वस्य वीरश्रेष्ठस्य तस्य ते ।
प्रतिमाः पूजयामासुर्मनसा परिकल्पिताः ॥४॥

हृद्यालङ्कार-सद्भाव-रसोज्ज्वलगिरस्तथा ।
कवयः कवयांचक्रुर्नानाभाषासु तद्यशः ॥५॥

साधवो रामदासाद्या देवधर्मपरायणाः ।
शिवं प्रशंसयामासुर्भुवं गतमिवेश्वरम् ॥६॥

अथ विन्ध्याद्रिपर्यन्त-निवासी राजवंशजः ।
किशोरः कोऽपि तेजस्वी शिवान्तिकमुपागतः ॥७॥

साष्टाङ्गपातं प्रणतं तं वीरं प्रियदर्शनम् ।
वात्सल्येन सुसम्भाव्य प्राह सद्वत्सलः शिवः ॥८॥

कस्त्वं वीर ! कुतस्योऽसि किमागमनकारणम् ?
अदृष्टपूर्वमूर्ति त्वां तत्त्वतो ज्ञातुमुत्सहे ॥९॥

स उवाच किशोरस्तं विनयानतमस्तकः ।
चिराय हृदि निध्यातं साक्षात्कुर्वन् स्वदेवतम् ॥१०॥

"भगवन् ! विन्ध्यवास्तव्यं बुन्देलक्षत्रियोद्भवम् ।
विद्धि मां छत्रसालाख्यं त्वद्भक्तिविवशीकृतम् ॥११॥

पिता चम्पतरायो मे स्वाभिमानमहाधनः ।
विगृह्णन् देहलीन्द्रेण रणे वीरगतिं गतः ॥१२॥

माता कालीकुमारी मे दुःखवार्तां निशम्य ताम् ।
तत्कालमेव खड्गेन चिच्छेदात्मशिरः स्वयम् ॥१३॥

तदानीमसहायोऽहमात्मत्राणपरायणः ।
सेनायां जयसिंहस्य सैनिकत्वमवाप्तवान् ॥१४॥

Scanned by CamScanner

साधं तस्य वरूथिन्या सह्यगर्भे पुरागतः ।
पुरन्दररणे स्तोकं विक्रमं कृतवानहम् ॥१५॥
आगरां प्रति निर्याते त्वयि देव ! दयानिधे !
साकं दिलेरसैन्येन रणान्तरमहं गतः ॥१६॥
ततो गोण्डवनप्रान्ते दुर्गे देवगडाभिधे ।
प्रवर्तितं महद् युद्धं दिलेरेण जिगीषुणा ॥१७॥
क्षत्रियास्ते स्वधर्मीयाः स्वातन्त्र्यार्थं युयुत्सवः ।
भूयांसो मर्दिता देव ! रणोन्मत्तधिया मया ॥१८॥
मद्वीर्येणैव दुर्गोऽसौ देव ! देवगडाभिधः ।
म्लेच्छाणां वशमायातो गोण्डास्ते च पराहताः ॥१९॥
तथ्याऽतथ्यानभिज्ञेन तदा दिल्लीमहीभुजा ।
भूयसा दानमानेन दिलेरः सोऽभिनन्दितः ॥२०॥
इत्थङ्कारं सुविज्ञाय म्लेच्छाधिप-कृतघ्नताम् ।
बभूव नितरां क्षुब्धं भगवन् ! हृदयं मम ॥२१॥
म्लेच्छसेवां परित्यज्य सेवां कर्तुं प्रभो ! तव ।
जीवोऽयं व्याकुलीभूतस्त्वच्चारित्र्यवशंगतः ॥२२॥
कारावासाद् विमुक्तेन त्वया देव ! जयिष्णुना ।
सङ्ग्रामसत्रमारब्धं म्लेच्छराज्य लयंकरम् ॥२३॥
अभ्याक्रम्य निरोद्धुं तद् युद्धसत्रमखण्डितम् ।
दिल्लीन्द्रेण दिलेरोऽसावाज्ञप्तो रणकोविदः ॥२४॥
सेनाचरतया तस्याहं पुनः सह्यमागतः ।
मन्ये हठादिवाकृष्टस्त्वद्भक्त्यैव प्रगल्भया ॥२५॥
सेनानिवेशं सन्त्यज्य क्रान्त्वाद्रि-शिखराणि च ।
दुस्तराः सरितस्तीर्त्वा शरण्यं त्वामुपागमम् ॥२६॥
कालेनैतावता देव ! नीतमायुर्मया वृथा ।
इतः प्रभृति तद् भूयात् सेवायां तव सार्थकम् ॥२७॥
म्लेच्छसाम्राज्यवृद्ध्यर्थं व्यापृता या चिरं मया ।
दीप्ता खड्गलता सेयमर्प्यते तव पादयोः ॥२८॥
म्लेच्छाधिपानां गोघ्नानामग्रतः पाप्मनापि ।
शिरो यत् प्रणतं भूयो निदधे पादयोस्तव ॥२९॥
नातः परमिदं देव ! जीवितं लेशतोऽपि मे ।
सेवायां म्लेच्छभूपानामधमानां गमिष्यति ॥३०॥

Scanned by CamScanner

तव सेवा परो धर्मस्तव सेवा परं तपः ।
तव सेवा परो यज्ञो भगवन् ! खलु मे मतः ॥३१॥
सलोकत्वं समीपत्वं सरूपत्वं परात्मनः ।
सायुज्यत्वं च भगवन् सेवायां प्राप्नुयां तव ॥३२॥
निरये परदास्याख्ये पतिताय चिरं प्रभो ।
स्वातन्त्र्यस्वर्ग-सौभाग्यं देहि मह्यमतः परम् " ॥३३॥
इत्येवं छत्रसालस्य तस्य वृत्तिं तथाविधाम् ।
विज्ञाय वचसानेन जहर्ष नितरां शिवः ॥३४॥
स्वपादानतमूर्धानं तमुत्थाप्य किशोरकम् ।
प्रेम्णा सुतवदाश्लिष्य तथ्यवादी जगाद सः ॥३५॥
" चिरस्य परदास्येन सत्त्वशून्येऽत्र भारते ।
स्वत्वाभिमानी वीरस्त्वं पुण्येन खलु दृश्यसे ॥३६॥
म्लेच्छदास्यं परित्यज्य स्वातन्त्र्यार्थं समुत्सुकः ।
छत्रसाल ! विजानीहि मदात्मासि बहिश्चरः ॥३७॥
नूनं मनुष्यदेहोऽयं मुक्तिमात्रप्रयोजनः ।
परदास्ये स चेल्लग्नो जीवितान्मरणं वरम् ॥३८॥
मयाऽत्र दक्षिणप्रान्ते म्लेच्छाणां पापकर्मणाम् ।
आधिपत्यविनाशार्थं युद्धसत्रं प्रवर्तितम् ॥३९॥
अन्यद् गोविन्दसिंहेन गुरुणा वीर्यशालिना ।
उत्तरस्यां दिशीदानीं प्रवर्तितमिति श्रुतम् ॥४०॥
स्वत्वाभिमानी वीरस्त्वं परदास्याज्जुगुप्सितः ।
संघटय्य जनान् स्वीयान् मुक्तियुद्धं प्रवर्तय ॥४१॥
जाने बुन्देलवंशीयाः क्षत्रिया विन्ध्यवासिनः ।
असाधारणशौर्येण सङ्ग्रामे दुर्जया इति ॥४२॥
त्वादृशं वीरनेतारं लब्ध्वा ते सत्त्वशालिनम् ।
स्वराज्यपीठनिर्माणे प्रभवेयुः सुनिश्चितम् ॥४३॥
त्रेधा त्रिषु प्रदेशेषु समकालमखण्डितम् ।
खण्ड्यमानमिदं म्लेच्छसाम्राज्यं द्राग् विनङ्क्षति ॥४४॥
पृथ्वीराजात् प्रभृत्येव या क्वचिद् विलयं गता ।
स्वातन्त्र्यलक्ष्मीः सा भूयो भारते विहरिष्यति ॥४५॥
त्वादृशाः पञ्चषा वीराः सैनापत्यधुरन्धराः ।
सन्ति चेद् भारते वर्षे परदास्यं प्रणश्यति ॥४६॥

Scanned by CamScanner

आसुरं बलमाहन्तुं प्रवृत्तानां सतां सदा ।
संरक्षणं करोत्येव श्रीकृष्णस्य सुदर्शनम् ॥४७॥

सशस्त्राष्टभुजा देवी महिषासुरमर्दिनी ।
असुरध्वंसनिष्ठानां कुरुते जयमङ्गलम् ॥४८॥

तदुत्तिष्ठ नरव्याघ्र ! याहि विन्ध्याटवीं पुनः ।
स्वराज्यायैव युध्यस्व सर्वशक्त्या निरन्तरम् ॥४९॥

तवैवं युध्यमानस्याभ्युदयायैव सर्वथा ।
छत्रसाल ! मदीयाः हि सन्त्यसंख्याः शुभाशिषः" ॥५०॥

इत्थं स्वराज्यरणवीरगुरोः शिवस्य
सन्देशवाचमधिगत्य नितान्ततुष्टः ।
धृत्वाशिषं प्रणतिनम्रतमेन मूर्ध्ना
वीरः स्वराज्यविजयाय स सम्प्रतस्थे ॥५१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'छत्रसालप्रबोधनम्' नाम ५९ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ६० तमः सर्गः ॥

पर्णालविजयः

अथ पर्णालदुर्गं तं चिरादरिवशंगतम् ।
अभ्याक्रम्य पुनर्जेतुं शिवराजः समैहत ॥१॥

अनाजिपन्तनामानं रणधीरं स्वमन्त्रिणम् ।
दुर्गमर्मविदं वीरं कार्येऽस्मिन् स न्ययोजयत् ॥२॥

कोण्डाजिनामा वीरोऽन्यः फर्जन्दकुलसम्भवः ।
प्रेषितस्तत्सहायाय शतशार्दूलविक्रमः ॥३॥

मोत्याजिश्च गणाजिश्च दुर्गयुद्धविशारदौ ।
शिवादेशेन निर्यातौ तत्सहायाय सङ्गरे ॥४॥

ते दुर्गमभितः सर्वे परिक्रम्य दिवानिशम् ।
रन्ध्रमन्वेषयाञ्चक्रुरन्तःसञ्चरणोचितम् ॥५॥

सुदुर्गतमं मार्गं दुर्गपालानवेक्षितम् ।
निरीक्ष्य सम्यक् कोण्डाजिरारोढुं नक्तमुद्यतः ॥६॥

सम्पिण्डित-तमस्काण्ड-सन्निकाशं तटं गिरेः ।
अध्यारुरोह वीरोऽसौ सोपानमिव लीलया ॥७॥

तमन्वगच्छंस्तत्कालं निःशब्दं शस्त्रशालिनः ।
केवलं षष्ठिसंख्याकाः सैनिकाः समरोत्सुकाः ॥८॥

नक्तं प्रविश्य दुर्गान्तः कृत्वा युद्धं घनाघनम् ।
प्रहरेण रिपून् हत्वा दुर्गस्तैरात्मसात् कृतः ॥९॥

शिवा विजयवार्तेयं नितान्तानन्दवर्धिनी ।
प्रहर्षोत्फुल्लनेत्रेण दूतेनोक्ता शिवं प्रति ॥१०॥

नववर्षशुभारम्भदिने सर्वत्र घोषिता ।
विजयानन्दवार्तेयं शतघ्नीघनगर्जनैः ॥११॥*

पाचाडग्रामवास्तव्यां पूजनीयां स्वमातरम् ।
स्वयमावेदयामास जयवार्तामिमां शिवः ॥१२॥

स्वर्णदानैः सुसम्मानैर्वीरानद्भुतकर्मणः ।
सन्तोषयितुमुद्यातः स पर्णालं प्रति द्रुतम् ॥१३॥

सुदुर्लभतमं दुर्गं लब्ध्वा द्वादशवत्सरैः ।
अलब्धपूर्वमानन्दं स लेभे लाभलोलुभः ॥१४॥

---

* १६१६ शके

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ६० तमः सर्गः ॥

पर्णालविजयः

अथ पर्णालदुर्गं तं चिरादरिवशंगतम् ।
अभ्याक्रम्य पुनर्जेतुं शिवराजः समैहत ॥१॥

अनाजिपन्तनामानं रणधीरं स्वमन्त्रिणम् ।
दुर्गमर्मविदं वीरं कार्येऽस्मिन् स न्ययोजयत् ॥२॥

कोण्डाजिनामा वीरोऽन्यः फर्जन्दकुलसम्भवः ।
प्रेषितस्तत्सहायाय शतशार्दूलविक्रमः ॥३॥

मोत्याजिश्च गणाजिश्च दुर्गयुद्धविशारदौ ।
शिवादेशेन निर्यातौ तत्सहायाय सङ्गरे ॥४॥

ते दुर्गमभितः सर्वे परिक्रम्य दिवानिशम् ।
रन्ध्रमन्वेषयाञ्चक्रुरन्तःसञ्चरणोचितम् ॥५॥

सुदुर्गतमं मार्गं दुर्गपालानवेक्षितम् ।
निरीक्ष्य सम्यक् कोण्डाजिरारोढुं नक्तमुद्यतः ॥६॥

सम्पिण्डित-तमस्काण्ड-सन्निकाशं तटं गिरेः ।
अध्यारुरोह वीरोऽसौ सोपानमिव लीलया ॥७॥

तमन्वगच्छंस्तत्कालं निःशब्दं शस्त्रशालिनः ।
केवलं षष्ठिसंख्याकाः सैनिकाः समरोत्सुकाः ॥८॥

नक्तं प्रविश्य दुर्गान्तः कृत्वा युद्धं घनाघनम् ।
प्रहरेण रिपून् हत्वा दुर्गस्तैरात्मसात् कृतः ॥९॥

शिवा विजयवार्तेयं नितान्तानन्दवर्धिनी ।
प्रहर्षोत्फुल्लनेत्रेण दूतेनोक्ता शिवं प्रति ॥१०॥

नववर्षशुभारम्भदिने सर्वत्र घोषिता ।
विजयानन्दवार्तेयं शतघ्नीघनगर्जनैः ॥११॥*

पाचाडग्रामवास्तव्यां पूजनीयां स्वमातरम् ।
स्वयमावेदयामास जयवार्तामिमां शिवः ॥१२॥

स्वर्णदानैः सुसम्मानैर्वीरानद्भुतकर्मणः ।
सन्तोषयितुमुद्यातः स पर्णालं प्रति द्रुतम् ॥१३॥

सुदुर्लभतमं दुर्गं लब्ध्वा द्वादशवत्सरैः ।
अलब्धपूर्वमानन्दं स लेभे लाभलोलुभः ॥१४॥

---

* १६१६ शके

Scanned by CamScanner

दुर्गद्वारं प्रति प्राप्तं स्वामिनं पुण्यदर्शनम् ।
वीरास्ते पूजयामासुः सौवर्णैः कुसुमोच्चयैः ॥१५॥
कोण्डाजिप्रमुखान् वीरान् शार्दूलोर्जितविक्रमान् ।
सम्मानयन् स हि प्राप वीरमान्यः परां मुदम् ॥१६॥
सोऽयं पर्णालवृत्तान्तः परमाश्चर्यकारकः ।
विजापुरीयसाम्राज्य-महामात्यमपीडयत् ॥१७॥
असावन्याननन्याप्तान् मन्त्रिणो मन्त्रिणां वरः ।
खिन्नः खेदाकुलान् सर्वान् मिथो वक्तुं प्रचक्रमे ॥१८॥
"बान्धवाः किं नु वक्तव्यं विषमे समयेऽधुना ।
साम्राज्यमिदमस्माकं क्रमशो याति यत् क्षयम् ॥१९॥
पञ्चवत्सरदेशीयः साम्राज्यस्यास्य पार्थिवः ।
अतोऽस्मदीये कर्तृत्वे वर्तते भवितव्यता ॥२०॥
पूर्वं फतेहखानोऽसावफझुल्लश्च फाझलः ।
जोहरश्च पराभूताः कुटिलेन शिवाजिना ॥२१॥
यदिदं दृश्यते किञ्चित् तस्य राज्यं नवोदितम् ।
तत् खल्वास्माकसाम्राज्यखण्डितांशो हि सर्वथा ॥२२॥
तदायत्तोऽपि पर्णालदुर्गोऽस्माभिः पुरार्जितः ।
सोऽधुना तेन दुष्टेन लीलयैव पुनर्जितः ॥२३॥
चत्वारिंशत्सहस्रेण सैनिकानां स जोहरः ।
न यं शशाक निर्जेतुं षष्टचा तेनाधुना जितः ॥२४॥
दिने दिने स साम्राज्यमस्माकं ग्रसतेतराम् ।
हुताशन इवोद्दीप्तो महारण्यं क्षणे क्षणे ॥२५॥
यद्युपेक्षामहेऽरिं तं ह्युदर्चिषमिवानलम् ।
अरण्यमिव साम्राज्यं सोऽचिरेण प्रधक्ष्यति ॥२६॥
पञ्चविंशति-वर्षाणि सर्वथापि निरोधितः ।
राजयक्ष्मेव दुःसाध्यो रिपुर्नासौ प्रशाम्यति ॥२७॥
वयं च देहलीन्द्रश्च ये चान्ये तस्य शत्रवः ।
पृथक् वा संहता वापि न तन्निर्दमने क्षमाः ॥२८॥
पर्णालदुर्गं निर्जित्य लीलया तेन साम्प्रतम् ।
सामर्थ्यं निजराज्यस्य नूनं शतगुणं कृतम् ॥२९॥
यदीदानीं सपद्येव नासौ निर्जीयते रिपुः ।
विजापुरीयं साम्राज्यं नचिरादेव नङ्क्ष्यति" ॥३०॥

इत्थं खवासखानस्य महामात्यस्य तद्वचः ।
निशम्यान्यतमोऽमात्यः सहसा तेष्वभाषत ॥३१॥
"मन्त्रिवर्य ! यदप्युक्तं भवता दूरदर्शिना ।
वस्तुस्थितिविदस्तस्य के न जानन्ति तथ्यताम् ॥३२॥
अलं कृत्वा परां चिन्तां वृद्धिमालक्ष्य शात्रवीम् ।
प्रतिकर्तुममुं शत्रुं यदस्माकमलं बलम् ॥३३॥
अयं करिकराकार-बाहुशाली महाबली ।
अलोलो बहलोलस्ते ह्याधिमुत्सारयिष्यति ॥३४॥
पर्याप्तबलसाहाय्यो धीरोऽयं रणकोविदः ।
तवाधिना समं शत्रुं हठात् प्रशमयिष्यति" ॥३५॥
मतमेतदमुष्यान्येऽप्यमात्यास्तत्र संस्थिताः ।
तत्कालमैकमत्येन निःशङ्कमनुमेनिरे ॥३६॥
बहलोलोऽपि लोलात्मा ह्यनयात्मप्रशंसया ।
वीरमानी समुत्थाय सहसा खड्गमुद्दधौ ॥३७॥
बभाण च नवाम्भोदध्वनिगम्भीरया गिरा ।
मन्दोत्साहानमून् सर्वानुच्चैः प्रोत्साहयन्निव ॥३८॥
"बान्धवा राजकर्तव्यं यन्मत्तः समपेक्ष्यते ।
नितरामवगच्छामि तत्रत्याः सकलापदः ॥३९॥
तथापि जगदीशस्य भवतां च शुभाशिषा ।
बाढं प्रदमयिष्ये तं शिवाजिं समराङ्गणे ॥४०॥
अपर्याप्तं बलं तस्य तदप्यारण्यकात्मकम् ।
चतुरङ्गं तदस्माकं समृद्धं च सुशिक्षितम् ॥४१॥
प्रायो दैवानुकूल्येन विदन्ते भीरवो जयम् ।
अनिच्छतोऽपि दैवस्य विजयन्ते बलाधिकाः ॥४२॥
तदितो बलमादाय प्रभूतं चतुरङ्गकम् ।
अपराजितपूर्वं तं जेष्यामि विपिनेचरम् ॥४३॥
आदौ पर्णालदुर्गं तं जित्वा दुर्गोत्तमं द्रुतम् ।
अन्यानपि हि जेष्यामि योधं योधं स्थले स्थले ॥४४॥
अनिर्जित्य शिवाजिं तं ह्यस्मत्साम्राज्यवैरिणम् ।
न जातु बहलोलोऽयमत्र प्रत्यागमिष्यति" ॥४५॥
इत्येवं भाषणं तस्य निशम्य बलशालिनः ।
साधुवादैरमात्यास्तेऽभिननन्दुस्तमुच्चकैः ॥४६॥

Scanned by CamScanner

इत्थं खवासखानस्य महामात्यस्य तद्वचः ।
निशम्यान्यतमोऽमात्यः सहसा तेष्वभाषत ॥३१॥

"मन्त्रिवर्य ! यदप्युक्तं भवता दूरदर्शिना ।
वस्तुस्थितिविदस्तस्य के न जानन्ति तथ्यताम् ॥३२॥

अलं कृत्वा परां चिन्तां वृद्धिमालक्ष्य शात्रवीम् ।
प्रतिकर्तुममुं शत्रुं यदस्माकमलं बलम् ॥३३॥

अयं करिकराकार-बाहुशाली महाबली ।
अलोलो बहलोलस्ते ह्याधिमुत्सारयिष्यति ॥३४॥

पर्याप्तबलसाहाय्यो धीरोऽयं रणकोविदः ।
तवाधिना समं शत्रुं हठात् प्रशमयिष्यति" ॥३५॥

मतमेतदमुष्यान्येऽप्यमात्यास्तत्र संस्थिताः ।
तत्कालमैकमत्येन निःशङ्कमनुमेनिरे ॥३६॥

बहलोलोऽपि लोलात्मा ह्यनयात्मप्रशंसया ।
वीरमानी समुत्थाय सहसा खड्गमुद्दधौ ॥३७॥

बभाण च नवाम्भोदध्वनिगम्भीरया गिरा ।
मन्दोत्साहानमून् सर्वानुच्चैः प्रोत्साहयन्निव ॥३८॥

"बान्धवा राजकर्तव्यं यन्मत्तः समपेक्ष्यते ।
नितरामवगच्छामि तत्रत्याः सकलापदः ॥३९॥

तथापि जगदीशस्य भवतां च शुभाशिषा ।
बाढं प्रदमयिष्ये तं शिवाजिं समराङ्गणे ॥४०॥

अपर्याप्तं बलं तस्य तदप्यारण्यकात्मकम् ।
चतुरङ्गं तदस्माकं समृद्धं च सुशिक्षितम् ॥४१॥

प्रायो दैवानुकूल्येन विदन्ते भीरवो जयम् ।
अनिच्छतोऽपि दैवस्य विजयन्ते बलाधिकाः ॥४२॥

तदितो बलमादाय प्रभूतं चतुरङ्गकम् ।
अपराजितपूर्वं तं जेष्यामि विपिनेचरम् ॥४३॥

आदौ पर्णालदुर्गं तं जित्वा दुर्गोत्तमं द्रुतम् ।
अन्यानपि हि जेष्यामि योधं योधं स्थले स्थले ॥४४॥

अनिर्जित्य शिवाजिं तं ह्यस्मत्साम्राज्यवैरिणम् ।
न जातु बहलोलोऽयमत्र प्रत्यागमिष्यति" ॥४५॥

इत्येवं भाषणं तस्य निशम्य बलशालिनः ।
साधुवादैरमात्यास्तेऽभिननन्दुस्तमुच्चकैः ॥४६॥

Scanned by CamScanner

पञ्चवत्सरदेश्योऽसौ विजापुरमहीपतिः ।
ताम्बूलखड्गदानेन वीरं तं बह्वमानयत् ।।४७।।
प्रभूतं सैन्यमादाय गजोष्ट्रहयसंकुलम् ।
वित्तकोशमपारं च प्रतस्थे समराय सः ।।४८।।
अथ प्रस्थानवृत्तान्तो बहलोलस्य सत्वरम् ।
चरैरावेदयाञ्चक्रे पर्णालस्थं शिवं प्रति ।।४९।।
तत्कालं सुहृदो वीरानन्तिकस्थान् रणोत्सुकान् ।
प्रतापरावप्रमुखान् मन्त्रणार्थं स आह्वयत् ।।५०।।
मिथः सम्मन्त्र्य तैर्वीरैर्वृकयुद्धविचक्षणैः ।
प्रतापरावं वीराग्र्यमादिशद् रिपुमर्दने ।।५१।।
सहस्रेणैव वीराणां पञ्चाधिकदशेन सः ।
अन्वायातो महावीरैः प्रातिष्ठत धुरन्धरः ।।५२।।
उमराणीसमीपस्थं बहलोलं वगत्य च ।
न्यरुणद् गूढमागत्य पानीयसलिलाशयम् ।।५३।।
न चिराद् ग्रीष्मसन्तप्तास्तृषार्ता म्लेच्छसैनिकाः ।
ददृशुः शिवसैन्येन सन्निरुद्धं जलाशयम् ।।५४।।
मतङ्गाश्च तुरङ्गाश्च बलीवर्दाः क्रमेलकाः ।
तृट्क्षामकण्ठाः क्रन्दन्तो जलार्थं परिबभ्रमुः ।।५५।।
यन्तारः सादिनः सर्वे पत्तयश्च तृषाकुलाः ।
आपस्तोयं जलं वारि पानीयं चेति चुक्रुशुः ।।५६।।
तदानीमेव संवर्त-प्रकम्पन-तरस्विनी ।
सेना प्रतापरावस्य म्लेच्छानीकेऽभ्यवापतत् ।।५७।।
अन्तः पिपासयात्यर्थं बहिश्च शरवर्षणैः ।
सेनाऽसौ दह्यमानेव पलायनपराऽभवत् ।।५८।।
सुपराभूतमात्मानं बहलोलः स दर्शिवान् ।
प्रजिघाय प्रतापाय कंचित् प्रतिनिधिं निजम् ।।५९।।
स बद्धाञ्जलिरागत्य सत्वरं जलविह्वलः :
प्रतापरावमब्रूत प्रणिपत्य मुहुर्मुहुः ।।६०।।
"अलं प्रहृत्य नः सेनां पिपासापरिशोषिताम् ।
शरणागतदीनेषु वीरवर्ग ! दयां कुरु ।।६१।
सेवकानां परो धर्मो यत् स्वाम्यादेशपालनम् ।
तेनैवाऽत्र समायाता सेनेयं समराङ्गणे ।।६२।।

Scanned by CamScanner

न लेशतोऽपि विद्वेषः खल्वस्मासु शिवं प्रति ।
अलौकिक-गुणाढ्योऽसौ वन्द्यो नः पुरुषोत्तमः ॥६३॥

पूर्वं कार्तलबानीकं तुङ्गारण्ये तृषाकुलम् ।
मुमुचे जलपानाय तेनात्यन्तदयालुना ॥६४॥

इदानीं सैन्यमस्माकं तस्य प्रतिनिधिर्भवान् ।
तादृशीं करुणां कृत्वा जलपानाय मुञ्चतु ॥६५॥

अयमेव परो धर्मस्तथा नीतिरियं परा ।
इदमेव परं पुण्यं यत् तृषार्तस्य तर्पणम् ॥६६॥

शरणागतवात्सल्यं हिन्दुधर्माभिमानिनाम् ।
भवादृशानां वीराणां दश-दिक्षु सुविश्रुतम् ॥६७॥

तदद्य हृदि निध्याय हिन्दुधर्मधुरन्धर !
प्रतापराव ! दीनेषु भवास्मासु दयापरः ॥६८॥

भावत्कं दीनकारुण्यं विज्ञाय स दयानिधिः ।
विन्देन्नितान्तमानन्दं शिवाजिर्नीतिनैष्ठिकः ॥६९॥

इत्येवमार्जवमयीं रिपुदूतवाचं
माध्वीकवत् सुमधुरां नितरां निपीय ।
मोहाभिभूतमतिना सहसा प्रताप-
रावेण हन्त मुमुचेऽरिवरूथिनी सा ॥७०॥

अन्तः पिधाय कपटोत्कटकालकूटं
वाचा बहिः शिवगुणामृतमुद्गिरन्ती ।
सानीकिनी सुतृषिता बहलोलमुख्या
नम्रानना बत जलाशयमुज्जगाम ॥७१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये पर्णालविजयो नाम
६० तमः सर्गः समाप्तः ॥

Scanned by CamScanner

श्रीशिवराज्योदये महाकाव्ये ६१ तमः सर्गः

प्रतापराव–हौतात्म्यम्

अथाऽसौ बहलोलाह्वो द्विजिह्वो विप्रधर्षितः ।
प्रत्याघातार्थमश्रान्तः संससर्प वने वने ॥१॥

शिवः पर्णालदुर्गस्थो तद्वृत्तान्तं चरोदितम् ।
श्रुत्वैव सहसाऽत्यन्तं प्रक्रोधविवशोऽभवत् ॥२॥

अमान्तमन्तस्तं क्रोधं ज्वलदङ्गारसन्निभैः ।
अक्षरैरवगुण्ठयोग्रैः पत्रेणास्त्रमिवासृजत् ॥३॥

"प्रतापराव! शूरोऽसि तथैवासि दयापरः ।
कार्याकार्यविवेके तु विमूढः खलु भासि मे ॥४॥

दुरात्मा बहलोलोऽसौ गृहीतो यस्त्वया रणे ।
मदाज्ञया विना कस्मादकस्मात् स विमोचितः ॥५॥

म्लेच्छारयोऽपकुर्वन्ति सर्वथोपकृता अपि ।
तर्पिताः पयसात्यन्तं दशन्त्येव भुजङ्गमाः ॥६॥

अपकारिषु साधुत्वं साधूनामस्तु भूषणम् ।
स्वातन्त्र्यार्थं युयुत्सूनां नीतिज्ञानां तु दूषणम् ॥७॥

अकालस्थलकारुण्य-दुश्चेष्टादूषितात्मनः ।
प्रतापराव! नेच्छामि मुखं चापि तवेक्षितुम् ॥८॥"

रोषगर्भं शिवस्येदं पत्रमालोक्य दुःसहम् ।
सेनापतिर्बभूवान्तः पत्रिणेव विदारितः ॥९॥

उवाच तत्क्षणं सर्वान् सुहृदः सहकारिणः ।
"बहलोलं हनिष्यामि नश्यामि स्वयमेव वा ॥१०॥

यदीक्षितुं न वाञ्छन्ति स्वामिपादाः कलेवरम् ।
विनाशमुचितं मन्ये तस्यास्मिन् क्षण एव हि ॥११॥

शिवकार्यार्थमेवेदं शरीरं मे मतं शिवम् ।
शिवस्यैवाप्रियं तच्चेदशिवं किमतः परम् ॥१२॥"

इत्युक्त्वाल्पतमां वाचं विषादाहतचेतनः ।
बहलोलविघातार्थं प्रातिष्ठत ससैनिकः ॥१३॥

अष्टौ मासान् पराक्रम्य विजापुरमहीभुजः ।
तथाऽङ्ग्लानां च नीचानां धनकोषान् जहार सः ॥१४॥

Scanned by CamScanner

बह्लोलोऽपि पापात्मा विस्मृत्योपकृतिं पुरा ।
शिवराज्यविनाशार्थमविश्रान्तं प्रयत्नवान् ॥१५॥
स बङ्कापुरमायातः सेनामादाय भूयसीम् ।
अल्पीयसीं पराक्रम्य जघान शिववाहिनीम् ॥१६॥
तथाकस्मात् समीपस्थं विज्ञाय रिपुमात्मनः ।
प्रतापरावो द्वेषेण विवेकविधुरोऽभवत् ॥१७॥
उदीर्णकरवालोऽसौ हयारूढो महाजवः ।
बह्लोलविघातार्थमेकाकी सम्प्रतस्थरे ॥१८॥
आकर्णाकृष्ट-कोदण्डोद्गत-बाण-तरस्विनम् ।
तमन्वधावन् षड् वीरा झञ्झावातसहोदराः ॥१९॥
दावाग्नि-जटिलज्वाला-भीषणाः सप्त पर्वताः ।
प्रलयानल-सन्तप्त-कल्लोला वा महार्णवाः ।
धावन्तो मेनिरे लोकैर्वीरास्ते प्रलयङ्कराः ॥२०॥
सप्ताकारमिवायान्तं सप्ताश्वं परिभावयन् ।
बह्लोलः क्षणादासीद् बहुलोलविलोचनः ॥२१॥
ताः सप्तजिह्व-जिह्वावज्ज्वलन्त्यः खड्गविद्युतः ।
क्षणाद् विध्वंसयांचक्रुर्म्लेच्छवीरान् सहस्रशः ॥२२॥
नचिराद् यवनाम्भोदैराक्रान्तास्ते महौजसः ।
सप्तर्षय इवाकाशे सङ्ग्रामेऽदृश्यतां गताः ॥२३॥
अनायकमनीकं स्वं हतधैर्यमवेक्ष्य च ।
आनन्दरावः स्वीचक्रे स्वयं सेनापतेर्धुरम् ॥२४॥
बह्लोलस्वामिकानि पुराण्याक्रम्य सत्वरम् ।
प्रभूतस्वर्णरत्नाढ्यं धनकोषं जहार सः ॥२५॥
मध्येमार्गं विरुन्धानं बह्लोलं महारुषम् ।
दण्डयित्वा चकारासौ पलायनपरायणम् ॥२६॥
स्वातन्त्र्यरिपवश्चान्ये सम्बूल-खिजरादयः ।
सैन्यैः शिवस्य सोत्साहैः संगरेषु पराहताः ॥२७॥
प्रतापरावहीतात्म्यवार्तां विजयवार्तया ।
शृण्वन् दुःखाकुलस्वान्तो नाविन्दत शिवो मुदम् ॥२८॥
ऊचे चोद्दीप्तशोकाग्नि-ज्वाला-लीढमनोरथः ।
“प्रतापराव! मद्वाक्यशरैरेवासि हा हतः ॥२९॥

Scanned by CamScanner

चतुरङ्गमिदं सैन्यं सङ्ग्रामचतुरं तथा ।
अप्रधृष्यं च खल्वासीत् सेनाधिपतिना त्वया ॥३०॥

सेना हि परमा शक्तिः सैव राष्ट्रस्य चेतना ।
सत्-सेनापति-नीताऽसौ विजयश्रीप्रदायिनी ॥३१॥

त्वादृशा वीरसेनान्या सखे हन्त विनाकृतः ।
प्रतापराव! जातोऽस्मि भग्नबाहुरिवाऽधुना ॥३२॥"

एवं विलपतस्तस्य सुहृन्नाशाकुलात्मनः ।
प्रवृत्तिरागताऽकस्माद् भार्यानिधनबोधिनी ॥३३॥

काशी-काशीव नगरी शिवस्य परमप्रिया ।
धर्मपत्नी महासाध्वी सहसा त्रिदिवं गता ॥३४॥

अन्तर्निगृह्य सुविमर्शबलेन शोकं
शास्त्रोदितं परिसमाप्य च शान्तिकर्म ।
अङ्गीकृतव्रतविधाविव राजधर्मे
व्यग्रो बभूव नितरां स्थितधीः शिवाजिः ॥३५॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'प्रतापरावहौतात्म्यं' नाम
६१ तमः सर्गः समाप्तः ॥

॥ श्रीशिवराज्योदये महाकाव्ये ६२ तमः सर्गः ॥

गागाभट्ट–संकल्पः

अस्ति वाराणसी नाम स्वर्णदीतटसंस्थिता ।
पुरी पुण्यमयी साक्षाद् विश्वेश्वरनिवासभूः ॥१॥
मनुना मानवेन्द्रेण निर्मितायां पुरीह ते ।
अमृतत्वाय वाञ्छन्ति मानव्यममृतान्धसः ॥२॥
मातापितृभ्यां जगतो भवान्या च भवेन च ।
न कदापि विमुक्तेति ह्यविमुक्तेति यां विदुः ॥३॥
परमानन्दरूपोऽपि जगदात्मा सदाशिवः ।
स्वानन्दं विन्दतेऽत्रेति या स्मृताऽऽनन्दकाननम् ॥४॥
कल्पान्ते ह्यत्र भूतानि बीजरूपेण शेरते ।
तस्मान्महाश्मशानाख्यां या धत्ते परमाद्भुताम् ॥५॥
अज्ञानिनोऽपि पुर्यस्यां जीवा मुक्तकलेवराः ।
सायुज्यतां भजन्तीति परा मोक्षपुरीह या ॥६॥
विश्वनाथत्रिशूलस्थां यां त्रिकालदृढस्थिराम् ।
विध्वंसितुं न शक्नोति कालोऽपि प्रलयंकरः ॥७॥
वेद-ब्राह्मण-वेदान्ताः पुराणान्यखिलानि च ।
इतिहासाश्च गायन्ति यस्या माहात्म्यमद्भुतम् ॥८॥
पार्श्वनाथ-महावीर-मुख्यास्तीर्थङ्कराः पुरा ।
अहिंसापरमं धर्मं यत्रोच्चैः प्रत्यपादयन् ॥९॥
यज्ञहिंसानिवृत्त्यर्थं पञ्चशीलप्रवृत्तये ।
यत्र प्रवर्तयामास धर्मचक्रं तथागतः ॥१०॥
भगवान् शङ्कराचार्योः सोऽद्वैतं श्रुतिसम्मतम् ।
यत्र संस्थापयामास जीवात्मपरमात्मनोः ॥११॥
म्लेच्छान् कुषाणवंशीयान् हुत्वा च समराध्वरे ।
दशाश्वमेधैः सम्प्रीता यत्र भारशिवैः सुराः ॥१२॥
मन्दिरैर्गगनोत्तुङ्गैर्गङ्गान्तः प्रतिबिम्बितैः ।
याऽनिशं काशतेऽत्यर्थं तस्मात् काशीति संज्ञिता ॥१३॥
यत्र वारीणि तीर्थानि शर्कराः शिवपिण्डिकाः ।
द्रुमाः कल्पद्रुमप्रख्या वृषास्ते नन्दिकेश्वराः ॥१४॥
मठे मठे धर्मपीठं विद्यापीठं गृहे गृहे ।
यत्राद्भुतं शक्तिपीठं सतीकुण्डलमण्डितम् ॥१५॥

Scanned by CamScanner

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला ।
नाऽसौ धर्मो महामान्यो यः काश्यां न विराजते ॥१६॥
नासौ देवो न वा देवी यागी योगी ऋषिर्मुनिः ।
ज्ञानी गुणी धनी दानी येन काशी न सेविता ॥१७॥
स्नानं ध्यानं जपो दानं भगवद्गुणकीर्तनम् ।
गङ्गासोपानखण्डेषु यत्राखण्डं प्रवर्तते ॥१८॥
विश्वनाथो महाराजो महामन्त्री हरेश्वरः ।
तारकेशो धनाध्यक्षो ढुण्ढिराजो नियन्त्रकः ॥१९॥
वीरेश्वरः कोषपालो दण्डपाणिश्च दण्डधृक् ।
भैरवो रक्षको यत्र किङ्कराः किन्नरादयः ॥२०॥
एवं दैवी राजधानी भारते या विराजते ।
तत्रासीद् ब्राह्मणो विद्वान् भट्टरामेश्वराभिधः ॥२१॥
तत्पुत्रः सर्वशास्त्रज्ञो भट्टनारायणाभिधः ।
वेदोक्ताचारसम्पन्नः शिवसेवापरायणः ॥२२॥
म्लेच्छाधिपतिनोत्क्षिप्तं शिवलिङ्गं सनातनम् ।
यः प्रतिष्ठापयामास यथापूर्वं यथाविधि ॥२३॥
ज्ञानविज्ञानसम्पन्ने तस्मिन् वंशेऽतिपावने ।
अभूवन् वेदशास्त्रज्ञाः सकलाः किल वंशजाः ॥२४॥
विद्वद्वंशस्य तस्यासीत् परमाभरणास्पदम् ।
भट्टविश्वेश्वरो नाम विश्ववन्द्यमहायशाः ॥२५॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्यो व्यासवदमन्यत ॥२६॥
गौतमस्य कणादस्य कपिलस्य पतञ्जलेः ।
जैमिनेः पाणिनेश्चैव यत्रासीत् शास्त्रविज्ञता ॥२७॥
कालिदासस्य माघस्य भारवेर्हर्षबाणयोः ।
यत्राभूद् भवभूतेश्च मतिरुन्मेषशालिनी ॥२८॥
अलौकिकगुणाढ्यस्य तस्यात्मजनुषः पिता ।
गागाभट्ट इति प्रख्यां चक्रे भट्टदिवाकरः ॥२९॥
शौर्यं धैर्यं दया दाक्ष्यं पावित्र्यं रणकौशलम् ।
स्वधर्मनीतिनिष्ठत्वं स्त्रीगोब्राह्मणरक्षणम् ॥३०॥
श्रावं श्रावं गुणान् दिव्यान् शिवस्यैतान् दिने दिने ।
काशीयात्रागतैः प्रोक्तान् सोऽभूत् तद्दर्शनोत्सुकः ॥३१॥
काश्यां शिवस्य सान्निध्यमुज्झित्वा लिङ्गरूपिणः ।
सह्यं प्रति प्रतस्थेऽसौ प्राप्तुं तन्नररूपिणः ॥३२॥

रेवाकलकलोन्नाद-प्रतिध्वानित-गह्वरम् ।
विन्ध्यमुल्लङ्घ्य दुर्लङ्घ्यं स सह्यतटमागतः ॥३३॥
गौतमीतीरमभ्येतं तं ज्ञात्वा ज्ञानसागरम् ।
जहर्ष नितरामन्तः शिवाजिः शौर्यसागरः ॥३४॥
पुमर्थमेव सम्भाव्य तमाद्यं नरदेहिनम् ।
प्रत्यभ्युद्गमयांचक्रे भक्त्याऽसौ स्वपुरोधसम् ॥३५॥
मानयित्वा पूजयित्वा श्रद्धया तं यथाविधि ।
पुरोधाः प्रापयामास गागाभट्टं शिवान्तिकम् ॥३६॥
ज्ञात्वा ब्रह्मर्षिमायान्तं तं रायगडसन्निधौ ।
प्रत्युज्जगाम राजर्षिर्दधत् पूजनभाजनम् ॥३७॥
साष्टाङ्गपातं प्रणतो विद्वद्वर्याङ्घ्रिपद्मयोः ।
सोऽगस्त्यचरणाम्भोजानतो विन्ध्य इवाबभौ ॥३८॥
श्रद्धया परया भूयो वन्दितस्यार्चितस्य च ।
तस्य वाचा स्वयं प्रोचुर्नूनं वेदाः शुभाशिषः ॥३९॥
नितरां सुप्रसन्नोऽसावातिथ्य्या सपर्यया ।
उवास सुखमात्मीये मङ्गले शिवमन्दिरे ॥४०॥
अथ प्रदोषकर्मान्ते शिवं प्रणतमस्तकम् ।
स्पृष्ट्वा मूर्ध्नि स भूदेवो भावं प्रोवाच हृद्गतम् ॥४१॥
"शिवराज पुराणानि सेतिहासान्यनेकदा ।
आलोडितानि सर्वाणि मया ज्ञानपिपासुना ॥४२॥
तत्र वीरचरित्राणि विचित्राणि सहस्रशः ।
चित्रीयमाणचित्तेन पठितानि मया भृशम् ॥४३॥
तेषु श्रीरामचन्द्रस्य लोककण्टकविद्विषः ।
तथा श्रीकृष्णचन्द्रस्य चरित्रं शेखरायते ॥४४॥
लोकोत्तरत्वं यद् किञ्चिद् गुणानां तत्र दृश्यते ।
सत्यं ब्रवीमि तन्नूनं त्वयि साक्षाद् विलोक्यते ॥४५॥
अलिपष्ठसैन्यकोषेण त्वयैकेनासुहृद्वता ।
म्लेच्छाधिपतयः सर्वे जिताः प्रागपराजिताः ॥४६॥
शत्रुसेनारजस्तोमैर्नितरां मलिनीकृतः ।
धर्मध्वजः स काषायस्त्वद्वीर्येणोज्ज्वलीकृतः ॥४७॥
म्लेच्छाधमैर्ध्वंसितानि मन्दिराणि सहस्रशः ।
देवद्रुहः पराहत्योत्थापितानि पुनस्त्वया ॥४८॥
सद्धर्मनीतिमर्यादा उत्सन्ना धर्मशत्रुभिः ।
स्थापितास्ता यथापूर्वं शुभाचारवता त्वया ॥४९॥

Scanned by CamScanner

पतिव्रतानां पावित्र्यं यदासीदसुरक्षितम् ।
तद्रक्षणेऽधुना नूनं त्वत्तेजः कवचायते ॥५०॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय त्वत्समो नापरोऽधुना ॥५१॥
अष्टानां लोकपालानां तेजो यल्लोकपालनम् ।
क्षत्रियोत्तंस! तत् सर्वं पश्यामि त्वयि पिण्डितम् ॥५२॥
वेदवेदान्तविज्ञानां कवीनां च कलावताम् ।
शिल्पिनां धर्मवीराणां नाश्रयस्त्वद् विनाऽपरः ॥५३॥
यागैर्योगैर्व्रतैः कृच्छ्रैर्यन्मया पुण्यमर्जितम् ।
तत्फलं खलु सम्प्राप्तं दृष्ट्वा त्वां पुरुषोत्तमम् ॥५४॥
परन्तु व्यथते चेतो मनाङ्मम यशोनिधे ।
अस्वर्णासनमच्छत्रं विलोक्य त्वामचामरम् ॥५५॥
नितान्तमभिषिक्तोऽपि लोकसद्भावनामृतैः ।
हा हन्त नाभिषिक्तोऽसि विधिवत् तीर्थवारिभिः ॥५६॥
विक्रमार्जितभूखण्डो राजदण्डधरोऽपि सन् ।
राजाऽप्यराजो राष्ट्रेऽस्मिन् यावन्नैवाभिषिच्यते ॥५७॥
तत् त्वां सिंहासनासीनं प्रस्फुरच्छत्रचामरम् ।
नरेन्द्र! गागाभट्टोऽयमभिषेक्तुं हि काङ्क्षति ॥५८॥
सप्तगङ्गाजलैः पुण्यैश्चतुर्वेदोक्तसूक्तकैः ।
राजन्निन्द्राभिषेकस्ते मयाऽत्रैव करिष्यते ॥५९॥
यत् रामस्याभिषेकेण वसिष्ठेन पुरार्जितम् ।
पुण्यं तदर्जयिष्यामि ब्राह्मणोऽहं तवाऽधुना ॥६०॥
इत्यात्मभावमतिसुस्फुटमुद्गरन्तीं
पीयूषसारमधुरां द्विजराजवाणीम् ।
आकर्णयन्त्यमितहर्षभवाश्रुवर्षैः ।
माता शिवस्य विदधे प्रथमाभिषेकम् ॥६१॥
ते मन्त्रिणश्च सुहृदश्च शिवैकनिष्ठाः
ते बान्धवाः समरसत्रसहायशूराः ।
संकल्पमग्रजवरोक्तममुं पवित्रं
काशीश्वरस्य हि निदेशमिवाभ्यनन्दन् ॥६२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'गागाभट्टसंकल्पो' नाम ६२ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ६३ तमः सर्गः ॥

भवानी–प्रार्थना

अथ राज्याभिषेकस्य शुभोदन्तो भविष्यतः ।
दिशो दशाप्यभिव्याप दिव्यकल्हारगन्धवत् ॥१॥
पीतमात्रमुदन्तं तं पीयूषरसवत्तरम् ।
पाययामासुरात्मीयान् प्रहृष्टाः शिवबान्धवाः ॥२॥
यतयो योगिनः सिद्धाः सन्तो भक्तिपरायणाः ।
अभिषिक्ता इवानन्दसुधया वार्तया तया ॥३॥
मन्दिरे मन्दिरे पुण्ये तीर्थे तीर्थे मठे मठे ।
उपासकैर्महापूजा दैवतानां प्रवर्तिताः ॥४॥
नानाध्मातस्तदा शङ्खो न मृदङ्गो ह्यनाहतः ।
मुरली झल्लरी तन्त्री नासीत् क्वचिदवादिता ॥५॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रावाऽथ वनेचराः ।
वृद्धा युवानः शिशवः सोल्लासं ननृतुर्जगुः ॥६॥
प्रसन्नवाचः कवयश्चारणा बन्दिनस्तदा ।
शिवराजयशोगीतं जगुरुच्चैः स्थले स्थले ॥७॥
ते महानन्दकल्लोला महाराष्ट्राब्धिसंभवाः ।
नितान्तं ताडयामासुर्म्लेच्छराज्यमहातटान् ॥८॥
दिनैः परिमितैरेव सर्वं भुवनमण्डलम् ।
शिवराज्याभिषेकस्य वार्तया सुप्रणादितम् ॥९॥
नवोदितस्वराज्यस्य राजधानीं सुरक्षिताम् ।
निर्मातुं रायरीदुर्गे निश्चकाय शिवस्तदा ॥१०॥
अप्रधृष्यं दुरारोहं गजराजमिवोन्नतम् ।
दुर्गं रायगडाख्यं तं सुसंस्कर्तुं स आदिशत् ॥११॥
तदाज्ञामनु सम्प्राप्ताः शतशोऽथ सहस्रशः ।
मनोज्ञनगरारम्भकुशलाः कारुशिल्पिनः ॥१२॥
ग्रावाणो दारुखण्डाश्च प्रचण्डा लोहदण्डकाः ।
अखण्डचन्तोचिताकारं शिल्पकारैरखण्डितम् ॥१३॥
वीथयश्चत्वरा रथ्याः प्रासादा देवतालयाः ।
सभालयाश्च विविधा रचितास्तैर्महल्लकाः ॥१४॥

Scanned by CamScanner

हस्त्यश्वशाला गोशालाः शस्त्रशालाश्च निस्तुलाः ।
यज्ञशाला धर्मशाला विशालास्तत्र निर्मिताः ॥१५॥
पाठशालाः पाकशालाः कलाशाला मनोरमाः ।
व्यायामशालाः सङ्गीत-रङ्गशालाश्च निर्मिताः ॥१६॥
गृहाणि दृढभित्तीनि भित्तयश्चित्ररञ्जिताः ।
चित्राणि भावरम्याणि राजधानीमराजयन् ॥१७॥
वाप्यः प्रफुल्लपद्मिन्यः पद्मान्युद्भ्रमराणि च ।
भ्रमरा गुञ्जनोन्मग्ना दुर्गे तत्र विरेजिरे ॥१८॥
सुधास्वादुफलाढ्यानि गन्धाढ्यकुसुमानि च ।
उद्यानानि सुरम्याणि दुर्गशोभामवर्धयन् ॥१९॥
घटितं स्वर्णकारेण ग्रीष्मभास्करभास्वरम् ।
स्वर्णसिंहासनं भव्यं सुरेन्द्रासनसन्निभम् ॥२०॥
प्रस्फुरल्लक्षनक्षत्र-मण्डिताकाश-सोदरम् ।
असंख्यरत्नखचितं राजछत्रं च सुन्दरम् ॥२१॥
वैजयन्त्यो ह्यसंख्येया अमन्दानिललोलिताः ।
नूनमभ्याह्वयांचक्रुः सर्वतोऽखिलसज्जनान् ॥२२॥
गीतवाद्यकलाविज्ञाः कथाकीर्तनकोविदाः ।
शस्त्रक्रीडाविशेषज्ञा मल्लविद्या-विशारदाः ॥२३॥
विचित्रवेशाः शैलूषा लब्धवर्णाश्च शास्त्रिणः ।
वश्यवाचः सुकवयो वैदिका घनपाठिनः ॥२४॥
भिन्नदेश्या भिन्नवेशा भिन्नचारगिरो नराः ।
शिवराज्याभिषेकार्थमेकीभावं प्रपेदिरे ॥२५॥
आनन्दसंज्ञिते वर्षे शालिवाहनभूपतेः ।
ऋतुग्रहमहाभूतसुधाकरमिते (१५९६) शुभे ॥२६॥
ज्येष्ठे सुदि त्रयोदश्यां प्रत्यूषे शनिवासरे ।
सुमुहूर्तोऽभिषेकस्य गागाभट्टेन निश्चितः ॥२७॥
पूर्वापर-महाम्भोधि-सङ्गतानां जलानि च ।
सर्वासां पुण्यसिन्धूनामाहर्तुं किंकरा ययुः ॥२८॥
अभिषेकाह्नि सम्प्राप्तप्रायेऽपि स नृपोत्तमः ।
यथापूर्वं महोत्साहो ददृशे राज्यवर्धने ॥२९॥
अहर्दिनं परिभ्रामन् वीरवर्यपरिच्छदः ।
अभ्येत्य भार्गवक्षेत्रं भार्गवं समपूजयत् ॥३०॥

Scanned by CamScanner

ततः प्रतापदुर्गस्थां भवानीमिष्टदेवताम् ।
स्वर्णच्छत्रोपचारेण परिपूजयितुं ययौ ॥३१॥

तत्र सम्पूजयन् देवीं महिषासुरमर्दिनीम् ।
प्राञ्जलिः प्रार्थयामास शिवाजिरतिभावुकः ॥३२॥

"जगदम्ब! नमस्तुभ्यं परमेश्वरवल्लभे ।
ऋद्धये सर्वसौख्यानां सिद्धये सर्वकर्मणाम् ॥३३॥

सर्वमङ्गलमाङ्गल्ये धर्मकामार्थसाधिके ।
शरण्ये सर्वलोकानां जगन्मातर्नमोऽस्तु ते ॥३४॥

प्रातर्मध्यन्दिने सायं प्रदोषे निशि चानिशम् ।
नमस्तेऽस्तु जगन्मातः सर्वकालसुखप्रदे ॥३५॥

शिवे भवानि रुद्राणि दुर्गे शर्वाणि पार्वति! ।
सवदा सर्वदे देवि विश्वमातर्नमोऽस्तु ते ॥३६॥

प्राच्यां प्रसन्नवदनामवाच्यामभयप्रदाम् ।
प्रतीच्यां त्वां शिवां वन्दे सदोदीच्यां च चण्डिके ॥३७॥

नमस्तुभ्यं महादेव्यै दुर्गायै सततं नमः ।
सर्वमङ्गलरूपायै श्रीभवान्यै नमो नमः ॥३८॥

सर्वानन्द-स्वरूपिण्यै सर्वदुःखान्तहेतवे ।
दिव्यशान्तिप्रदायिन्यै श्रीभवान्यै नमो नमः ॥३९॥

आयाहि चण्डिके देवि महिषासुरमर्दिनि! ।
गृहाण भावपद्मानां मालिकां हृदयङ्गमाम् ॥४०॥

आयाहि जननि प्रीत्या वस मे हृदयाम्बुजे ।
मदीयं जीवितं सर्वं निजायत्तं सदा कुरु ॥४१॥

श्रीखण्डं चन्दनं दिव्यं काश्मीरज-सुगन्धितम् ।
ललाटपट्टकेऽम्बायास्तव देव्याः समर्पये ॥४२॥

कुसुमानि सुगन्धीनि नानावर्णाकृतीनि च ।
पादयोः करयोर्मूर्ध्नि तव देवि समर्पये ॥४३॥

नीराजनमिदं भक्त्या दर्शयामि तवाम्बिके !
यत्प्रभामण्डले भाति रूपं दिव्योज्ज्वलं तव ॥४४॥

धूपो मलयजस्यायं तथा कालागुरोः शुभः ।
प्रकीर्यतेऽभितो भक्त्या कोमलाम्बुदमेचकः ॥४५॥

नाहं जानामि सङ्गीतकलां हृदयमोहिनीम् ।
तदापि परया भक्त्या गायामि स्तवनं तव ॥४६॥

Scanned by CamScanner

तां च नृत्यकलां देवि न जानामि मनागपि ।
नृत्यत्येव तथापीदं चेतोऽन्तस्त्वां विलोकयत् ।।४७।।
न प्रस्फुरन्ति ते शब्दा मातस्त्वत्स्तोत्रगायने ।
हृदयं तु ममाद्येदं तथापि परमोत्सुकम् ।।४८।।
कथं नु वर्णये दिव्यं महिमानं तवाम्बिके ।
किंकर्य इव सेवन्ते सिद्धयो यामहर्निशम् ।।४९।।
सदा विजयताम्बा प्रपन्नजनतारिणी ।
कृपाकटाक्षपातेन दुःखदैन्यनिवारिणी ।।५०।।
स्मरणं मङ्गलं देव्या मननं चित्तपावनम् ।
निदिध्यासनमापत्ति-क्लेशतापनिवारणम् ।।५१।।
स्मरणं ते महादेवि सदाऽस्तु मम मानसे ।
ममापि स्मरणं तद्वत् सदाऽस्तु तव मानसे ।।५२।।
अहो भाग्यमहोभाग्यं ममाद्य जगदम्बिके !
चित्तं विक्षिप्तमप्येतद् रमते स्मरणे तव ।।५३।।
संकल्पो वा विकल्पो वा प्रस्फुरन् हृदये मम ।
विषयस्तत्र मैवास्तु जननि त्वद्विनेतरः ।।५४।।
न लोभेन न दैन्येन न कार्पण्येन सर्वथा ।
जायतां त्वयि मे भक्तिः कदाचन कथञ्चन ।।५५।।
ये च केचन हे मातर्भावाः सन्ति मदन्तरे ।
त्वद्भक्तिरूपिणः सर्वे भवन्तु जगदम्बिके ।।५६।।
किमाभ्यां लोचनाभ्यां याभ्यां चेन्नासि वीक्षिता ।
कराभ्यां च किमेताभ्यां याभ्यां चेन्नासि पूजिता ।।५७।।
रसने रसविज्ञा चेदसि संज्ञास्तदा जप ।
शिवा भवानी रुद्राणी शर्वाणी पार्वतीति वा ।।५८।।
जगदम्ब महादेवि ! हृदयं मम सर्वथा ।
त्वदर्थे जायतां नित्यं व्याकुलं नितरामिदम् ।।५९।।
ते धन्यास्ते महात्मानस्ते हि लोकेऽत्र पूजिताः ।
येऽभूवन् जगदम्बायाः कटाक्षक्षेपभाजनम् ।।६०।।
दासोऽहं तव दीनोऽस्मि मातस्तव कृपां विना ।
कृपाकटाक्षनिक्षेपैः कुरु मां करुणास्पदम् ।।६१।।
धर्मस्यार्थस्य कामस्य निदानमिह भूतले ।
जगन्मङ्गलमाङ्गल्ये नान्यदस्ति त्वया विना ।।६२।।

Scanned by CamScanner

धीमन्तोऽपि महामूढा बलिनोऽप्ययशस्विनः ।
कर्मिणोऽपि निरुत्साहा मातस्तव कृपां विना ॥६३॥

त्वं हि शक्तिमतां शक्तिः साम्राज्यैश्वर्यवर्धिनी ।
जगत्संरक्षिणी नीतिः सद्धर्मसहचारिणी ॥६४॥

त्वं मूलप्रकृतिर्माया त्वत्तः सर्वसमुद्भवः ।
मङ्गलार्थाय लोकानां शम्भोरसि वशं गता ॥६५॥

जगज्जन्मादिसामर्थ्यं तत् स्वयंभु परात्मनः ।
यत् तु तत् सकलैश्वर्यं हेतुस्त्वं तत्र शङ्करी ॥६६॥

या चन्द्रे ह्लादिनी ज्योत्स्ना या सूर्ये भ्राजिनी प्रभा ।
या पद्मे मोहिनी कान्तिस्तत्र हेतुस्त्वमम्बिके ॥६७॥

सञ्जीवनमपत्यानां वात्सल्यं यद्धि मातृषु ।
तदेव तव कारुण्यमिह लोको सुगोचरम् ॥६८॥

तमो यथार्कद्योतेन विलयं याति तत्क्षणम् ।
तथैव त्वत्कटाक्षेण लोकदैन्यं शुभङ्करि ! ॥६९॥

त्वया जगति सौन्दर्यं त्वयौदार्यं त्वया बलम् ।
त्वया कृषिश्च वाणिज्यं गोरक्ष्यं च शिवप्रिये ॥७०॥

तृण-पायसरूपा वा भूत्वा धान्यफलात्मिकी ।
विश्वव्यापिनि मातस्त्वं कुरुषे जीवपोषणम् ॥७१॥

दधि देहि घृतं देहि देहि पायसमुत्तमम् ।
सद्धर्मनिष्ठलोकाय धनं धान्यं च देवते ॥७२॥

सम्राडपि जगत्स्वामी षड्गुणैश्वर्यशोभितः ।
अनाथ एव लोकेऽस्मिन् जगन्मातस्त्वया विना ॥७३॥

त्वदन्यच्छरणं नास्ति त्वदन्यन्नास्ति पोषणम् ।
त्वदन्यन्मङ्गलं नास्ति त्वदन्यन्नास्ति जीवनम् ॥७४॥

वाणी मौनायते क्षीणा देवि त्वद्गुणवर्णने ।
त्रपा विजृम्भते चान्तर्भूयो भूयोऽभियाचन्ते ॥७५॥

त्वामामनन्ति परमां शक्तिं शम्भोः परात्मनः ।
उत्पत्तिस्थितिसंहार-निदानं जगतोऽम्बिके ॥७६॥

श्रवणे मनने तद्वन्निदिध्यासनकर्मणि ।
त्वदन्यो मास्तु ते मातर्विषयः कोऽपि सर्वथा ॥७७॥

कृपामयि जगन्मातः शरणागतवत्सले ।
प्रतापदुर्गवास्तव्ये पाहि मां शरणागतम् ॥७८॥

Scanned by CamScanner

पाहि पाहि विपन्मग्नान् त्राहि त्राहि प्रपीडितान् ।
देहि देहि सुखं सद्भ्यो महेशहृदयेश्वरि ॥७९॥
किमर्पये जगन्मातः षड्गुणैश्वर्यदायिनि ।
गृहाण दीनभक्तस्य प्रणामं पादपद्मयोः ॥८०॥
दुर्दास्यतिमिरग्रस्ते मातर्निखिलभारते ।
विद्योतयतु माङ्गल्यं विभवं च कृपा तव ॥८१॥
करुणा तव चेन्मातर्वर्तते भावुके जने ।
का न्वसौ कामना लोके या न पूर्येत तत्क्षणम् ॥८२॥
नवोन्मेषमयी वाणी शक्तिर्वा जयशालिनी ।
विभ्राजते न लोकेऽस्मिन् देवि त्वत्करुणां विना ॥८३॥
क्रुद्धासि मयि किं दीनवत्सले जगदम्बिके ।
यन्न गोचरतां यासि प्रार्थितापि निरन्तरम् ॥८४॥
कदा गोचरतां यासि केन पुण्येन कुत्र वा ।
नैव जानाति हे मातः पामरोऽयं विमूढधीः ॥८५॥
दर्शनं नेत्रयोरस्तु श्रोत्रयोः श्रवणं तव ।
स्मरणं हृदये चाऽस्तु विश्वमङ्गलकारणम् ॥८६॥
एतदेव परं पुण्यमेतदेव परं सुखम् ।
एतदेव परं भाग्यं यन्मातस्तव दर्शनम् ॥८७॥
त्वन्मूर्तिमभितो मातर्दिव्यानन्दस्वरूपिणीम् ।
नेत्रज्योतिरिदं नित्यं कुर्यान्नीराजनक्रियाम् ॥८८॥
जागर्तौ वा सुषुप्तौ वा स्वप्ने वा मम देवते ।
यत् तवात्युज्ज्वलं रूपमाविरस्तु शुभास्पदम् ॥८९॥
निदानं सर्वसौख्यानां निधानं धनसम्पदाम् ।
प्रधानं सर्वशक्तीनां कृपाधानं तवाम्बिके ॥९०॥
सुप्रसन्नासि चेन्मातर्मयि त्वद्भक्तिलोलुपे ।
प्रार्थये सर्वलोकानां दुःखदैन्यनिवारणम् ॥९१॥
ज्ञानं देहि बलं देहि देहि चारित्र्यमुज्ज्वलम् ।
भक्तिं च परमां देहि भावुकेभ्यो निरन्तरम् ॥९२॥
अहङ्कारं मदं मोहं स्वार्थं लोभं च हृद्गतम् ।
निराकर्तुं त्वमेवालं महिषासुरमर्दिनि ॥९३॥
चिन्ताज्वालावलीढानां चेतांसि जगदम्बिके ।
त्वत्कृपाम्बुदवर्षेण शान्तिं विन्दन्तु शाश्वतीम् ॥९४॥

Scanned by CamScanner

उदग्रशस्त्रास्त्रभुजां क्रुद्धकण्ठीरवासनाम् ।
दीप्तार्कविग्रहां वन्दे महिषासुरमर्दिनीम् ॥९५॥
दुर्दान्तदैत्य-रुधिर-धारा-रक्तवपुःश्रियम् ।
विनिर्जितोद्यन्मार्तण्डरोचिषं नौमि चण्डिकाम् ॥९६॥
वाहनीभूतसिंहस्य रौद्रतामात्मरोचिषा ।
सहस्रकोटिगुणितां कुर्वतीं चण्डिकां भजे ॥९७॥
सिद्ध-देवर्षि-गन्धर्वनर-किन्नर-दानवैः
संस्तूयमानामत्यर्थं स्तुवे चण्डीमनारतम् ॥९८॥
प्रपन्नजनसम्मर्दं पीयूषमयचक्षुषा ।
स्नपयन्तीं दिवानक्तं चिन्तये सर्वमङ्गलाम् ॥९९॥
शशाङ्कशेखरं शम्भुं योगिनां परमं गुरुम् ।
स्वलावण्येन दिव्येन मोहयन्तीमुमां भजे ॥१००॥
शरणागतसद्भक्तान् प्रीणयन्तीं महासुखैः ।
मातरं सर्वभूतानामपर्णां चिन्तये सदा ॥१०१॥
प्रफुल्लपद्यरुचिरे पद्मरागनखद्युतौ ।
भवान्याः पादपद्मे मे नतमस्तु सदा शिरः ॥१०२॥
सर्वर्द्धिसिद्धिसुखदो भक्तानामभयंकरः ।
करस्ते वरदो मातर्मूर्ध्निनच्छत्रवदस्तु मे ॥१०३॥
सर्वलोकहितां शान्तां सिद्धदेवाधिदेवताम् ।
दिव्यशक्तियुतां वन्दे जगदम्बां शुचिस्मिताम् ॥१०४॥
जीवानाकीटमाब्रह्म संरक्षन्ती कृपामयी ।
सदा रक्षतु मां देवी चिदानन्दस्वरूपिणी ॥१०५॥
न बलाढ्येषु सामर्थ्यं न धनाढ्येषु वैभवम् ।
न सम्राट्स्वपि साम्राज्यं करुणा यदि नास्ति ते ॥१०६॥
भवन्ति कृतपुण्यानां केषाञ्चन महात्मनाम् ।
जीवितानि तवाम्बायाः परमानुग्रहास्पदम् ॥१०७॥
त्वमेवाखिलभक्तानामेकमालम्बनं परम् ।
अतोऽत्यार्ततया मातः प्रार्थये त्वामनारतम् ॥१०८॥
परिहर दैन्यं दुःखं प्रहर विपत्तिं समस्तभक्तानाम् ।
विरह च सदा प्रसन्ना मातः सह्याद्रि-शिखरेऽस्मिन् ॥१०९॥
पालय पालय दीनजनं तारय तारय भक्तजनम् ।
वारय वारय दुर्विपदं कारय कारय कल्याणम् ॥११०॥

Scanned by CamScanner

मनसि सदाऽस्तु तवोज्ज्वलमूर्तिः
   श्रवसि पततु तव पावनकीर्तिः ।
वचसि ममास्तु तवाम्ब सुनाम
   यल्लोकेऽखिलमङ्गलधाम ॥१११॥
चित्तं मदीयमयि लोकविपत्तिजाता ।
   चिन्ता चितेव सततं दहति प्रकामम् ।
हित्वाऽधुनाऽखिलविपद्गतवत्सलां त्वाम्
   अन्यं कमम्ब शरणं करवाणि देवम् ॥११२॥
तापं निवारय सदा त्रिविधं जनानां
   पापं च पञ्चविधमप्यपसारयस्व ।
शत्रुं विदारय च षड्विधमन्तरस्थं
   नानाविधं परिहराम्ब विपत्तिजालम् ॥११३॥
जयतु जयतु देवी सर्वसौख्यप्रदात्री
   जयतु जयतु चण्डी सर्वदैत्यापहन्त्री ।
जयतु जयतु दुर्गा सर्वभक्तप्रियाऽसौ
   जयतु जयतु माता सर्वदेवर्षिपूज्या ॥११४॥
जयतु मङ्गलदेवताऽखिललोकमाता शङ्करी ।
   जयतु नगपतिकन्यका हरवल्लभा विश्वम्भरी ।
जयतु किन्नर-नर-निशाचर-देव-ऋषि-मुनि-पूजिता
   जयतु विश्वशुभङ्करी कात्यायनी खलमर्दिनी ॥११५॥
दिव्यानन्दकरी यशोजयकरी त्रैलोक्य-शोभाकरी
   श्रेयःशान्तिकरी महासुखकरी सद्भक्तभद्रंकरी ।
आधिव्याधिभय-प्रणाशनकरी लोकत्रयाधीश्वरी
   सा मां पातु सदा चराचरकरी लोकोत्तरश्रीधरी ॥११६॥
भजामि हृदि सन्ततं भुवनमङ्गलाधायिनीं
   तमोऽभिभववारिणीमगणितार्कविद्योतिनीम् ।
मनोज्ञतमरूपिणीं यतिवरेण्यहृन्मोहिनीं
   त्रिलोकजननीमनन्तसुखदायिनीमम्बिकाम् ॥११७॥
तमः प्रविलयं यातु रजो नश्यतु सर्वथा ।
   सत्त्वमेकं परं मातर्वर्धतां भुवि सन्ततम् ॥११८॥

Scanned by CamScanner

नमस्ते नमस्ते समस्तर्द्धिकर्त्रि
  नमस्ते नमस्ते सुखानन्ददात्रि ।
नमस्ते सदा सर्वमाङ्गल्यधात्रि
  निजान् दीनदासानिमान् पाहि पाहि ॥११९॥

अम्ब स्थिरा भव सदा हृदि मामकीने
  पुण्यान् प्रपूरयितुमेव मनोरथान् मे ।
मातस्तवातिसदयः करुणाकटाक्षः
  दासे मयि प्रणिपतत्वनिशं प्रपन्ने ॥१२०॥

श्रीखण्डेन सुगन्धिना च कुसुमैरामोद-चेतोहरैः
  दीपैः स्वर्णशिखामयैः परिमलैः कालागुरूज्जृम्भितैः ।
स्तोत्रैर्भक्तिरसायनै रसमयैर्नैवेद्यपाकैस्तथा
  पूजां ते करवाणि विश्वजननि प्रेम्णा सदा मानसीम् ॥१२१॥

कामं स्तुवन्निति चिरं प्रयतो भवानीं
  छत्रेण रत्नखचितेन च पूजयित्वा ।
    छत्राधिपत्यविधिमङ्गलवर्धनार्थम्
      आमन्त्रयत् परमभक्तिमयः शिवाजिः ॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'भवानीप्रार्थना' नाम
६३ तमः सर्गः समाप्तः ॥

श्रीशिवराज्योदये महाकाव्ये ६४ तमः सर्गः

राज्याभिषेकारम्भः

अथोदितायां सुतिथौ चतुर्थ्यां ज्येष्ठे शुभे मासि च शुक्लपक्षे ।
प्राप्ताभिषेकस्य शिवस्य गागाभट्टश्चकार व्रतबन्धमादौ ॥१॥
विलुप्तसंस्कारतया चिराय सुक्षत्रवंशप्रभवो नृपोऽपि ।
निर्दोषितां श्रौतविधेर्विधित्सुः यज्ञोपवीतं विधिवद् दधार ॥२॥
गुरोः समर्थस्य हि भैक्ष्यपात्रे यः सर्वराज्यं प्रददौ वदान्यः ।
जातव्रतोऽसौ बत याचमानः कुलाङ्गना ॐ भवतीत्युवाच ॥३॥
।र्जापिमालोक्य च याचमानः अद्यापिराह स्म स सुप्रसन्नः ।
" रघोः प्रदत्ताखिलसम्पदोऽद्य हर्षस्य वा त्वं श्रियमुद्बिभर्षि" ॥४॥
मन्त्रं च दिव्यं विधिवद् गृहीत्वा विश्वस्य मित्रं किल यं ददर्श ।
स प्राङ्मुखो भ्रूयुगमध्यदृष्टिः पद्मासनस्थो बहुशो जजाप ॥५॥
ततः सुवर्णं रजतं च ताम्रं-लोहं त्रपु द्रव्यमनेकधा च ।
तुलाधिरूढस्य शिवस्य तुल्यभारं द्विजेभ्यः प्रददेऽखिलेभ्यः ॥६॥
ततोऽपरेद्युश्च विवाहयज्ञः प्रवर्तितो वैदिकमन्त्रघोषैः ।
उदूढपूर्वा अपि येन जाया राज्याभिषेकाय बभूवुरर्हाः ॥७॥
शिवात्मजास्तत्र तदा समोदं पित्रोर्विवाहं शुभमीक्षमाणाः ।
प्रचिक्षिपुर्हर्षभरेण सर्वे पूताक्षताः कुंकुम-शोणवर्णाः ॥८॥
इत्थं द्विजेन्द्रेण विधीयमानान् श्रौतान् विधीन् प्राथमिकान् समाप्य ।
बभूव सम्यक् प्रयतो मनस्वी राज्याभिषेकार्थमसौ नरेन्द्रः ॥९॥
अथोदितायां सुतिथौ च षष्ठ्यां संकीर्त्य काले शुभदेशकालौ ।
समग्रसाम्राज्यफलाप्तयेऽसा आवाहयन्मङ्गलमूर्तिमादौ ॥१०॥

श्रीमन्महागणपते प्रणवैकमूर्ते
देवाधिदेव! विबुधेश्वरवन्दिताङ्घ्रे ।
सर्वर्धिसिद्धिसहितोऽद्य समस्तकार्य-
निर्विघ्नपूर्तय उपेहि नमो नमस्ते ॥११॥
निघ्नन्नुपेहि सकलानपि दुष्टविघ्नान्
व्यापादयंश्च विपदः स्व-परश्वधेन ।
पाशेन घोरदुरितानि च तानि बध्नन्
दुःखानि च प्रतितुदन्निशितांकुशेन ॥१२॥

(अतःपरं सर्वोऽपि राज्याभिषेकविधिः श्रीगागाभट्ट-विरचित-शिव-राज्याभिषेक-प्रयोगाख्यग्रन्थानुसारं यथाक्रममत्र वर्ण्यंते :—)

Scanned by CamScanner

हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।
ऋद्धिसिद्धियुतत्र्यक्ष सर्वलोकपितः प्रभो ॥
नागास्यो नागहारस्त्वं गणनाथ चतुर्भुज ।
भूषणैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागच्छ गृहाण त्वं पूजां रक्ष च मे क्रतुम् ॥)

इत्यावाह्य गणाध्यक्षं पूजयित्वा यथाविधि ।
सपुष्पफलमर्घ्यं च प्रदातुं स प्रचक्रमे ॥१३॥

(रक्ष रक्ष गणाध्यक्ष मम त्रैलोक्यनायक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥
द्वैमातर कृपासिन्धो प्रभो षाण्मातुराग्रज ।
वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥
गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत ।
अनेन फलदानेन फलदो भव मे प्रभो ॥
विश्वेश्वराय वरदाय सुराधिपाय ।
लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय सितसर्पविभूषणाय
गौरीसुताय गणनाथ नमो नमस्ते ॥
भक्तार्तिनाशनपराय गणेश्वराय ।
सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय
भक्तप्रसन्नवरदाय नमो नमस्ते ॥
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥
वक्रतुण्ड महाकाय सूर्यकोटिसम-प्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥)

संस्थाप्य कलशौ सम्यग् दक्षिणोत्तरयोस्ततः ।
निक्षिप्त-गन्ध-कुसुम-दूर्वाकाञ्चन-रत्नकौ ॥१४॥
तन्मुखोपरि संस्थाप्य पूर्णपात्रे च मङ्गले ।
आवाहयत् पाशपाणिं वरुणं यादसां पतिम् ॥१५॥
पूजयित्वा च वरुणं सम्प्रार्थ्य कलशं ततः ।
शिरस्यञ्जलिमाधाय प्रार्थयत् पूजितान् द्विजान् ॥१६॥

Scanned by CamScanner

ततश्च तैरनुज्ञातः स पुण्याहमवाचयत् ।
भद्रं कर्णेभिरित्यादीन् मन्त्रानुच्चैःपठन्मुदा ॥१७॥
इति सम्प्रार्थिता विप्राः शिवराजेन ते तदा ।
जगाहिरे मुदा सर्वेऽप्येवमाशिर्मयीं गिरम् ॥१८॥

(करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः ।
सरीसृपाश्च ते श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः ।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः ॥
स्वाहा स्वधा शची चैव लक्ष्मीश्चैव अरुन्धती ।
सीता सती च सावित्री स्वस्ति कुर्वन्तु ते सदा ॥
असितो देवलो व्यासो विश्वामित्रस्तथाङ्गिराः ।
वसिष्ठः काश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा ॥
तुभ्यं स्वस्ति प्रयच्छन्तु कार्तिकेयश्च षण्मुखः ।
धातार्यमा च लोकेशा दिशश्च सदगीश्वराः ॥
तुभ्यं स्वस्ति प्रयच्छन्तु कार्तिकेयश्च षण्मुखः ।
विवस्वान् भगवान् स्वस्ति करोतु तव सर्वदा ॥
दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः ।
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥
स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ।
स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा ॥)

इत्येवं पठतो विप्रान् स समाधीयतामिति ।
प्रसीदन्विति चोवाच राजा सुप्रीतमानसः ॥१९॥
ततः पात्रे जलं यच्छन् कर्ता प्रयतमानसः ।
पपाठ पावनान् मन्त्रान् निध्यायन् परमेश्वरम् ॥२०॥

(शान्तिरस्तु ! पुष्टिरस्तु ! तुष्टिरस्तु ! वृद्धिरस्तु । अविघ्नमस्तु । आयुष्यमस्तु । आरोग्यमस्तु । शिवं कर्मास्तु । कर्मसमृद्धिरस्तु । शास्त्रसमृद्धिरस्तु । पुत्रसमृद्धिरस्तु । इष्टसम्पदस्तु । यच्छ्रेयस्तदस्तु । उत्तरे कर्मण्यविघ्नमस्तु ।

उत्तरोत्तराः क्रियाः शोभनाः सम्पद्यन्ताम् । तिथिकरणमुहूर्तनक्षत्रसम्पदस्तु । तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् । तिथिकरणे मुहूर्ते नक्षत्रे सग्रहे सदैवते प्रीयेताम् । दुर्गापाञ्चाल्यौ प्रीयेताम् । अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । इन्द्रपुरोगा

मरुद्गणाः प्रीयन्ताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । श्रीसरस्वत्यौ प्रीयेताम् । श्रद्धामेधे प्रीयेताम् । भगवती कात्यायनी प्रीयताम् । भगवती माहेश्वरी प्रीयताम् । भगवती पुष्टिकरी प्रीयताम् । भगवती तुष्टिकरी प्रीयताम् । भगवती वृद्धिकरी प्रीयताम् । भगवन्तौ विघ्नविनायकौ प्रीयेताम् । हरिहरहिरण्यगर्भाः प्रीयन्ताम् ।

हता ब्रह्मद्विषः । हताः परिपन्थिनः । हता अशुभ-कर्मणो विघ्नकर्तारः । शत्रवः पराभवं यान्तु ।

शाम्यन्तु घोराणि । शाम्यन्तु पापानि । शाम्यन्त्वीतयः । शुभानि वर्धन्ताम् ।

शिवा आपः सन्तु । शिवा ऋतवः सन्तु । शिवा अग्नयः सन्तु । शिवा औषधयः सन्तु । शिवा आहुतयः सन्तु । शिवा वनस्पतयः सन्तु । अहोरात्रे शिवे स्याताम् ।

निकामे निकामे नः पर्जन्यो वर्षतु । फलिन्यो न ओषधयः पच्यन्ताम् । योगक्षेमो नः कल्पताम् ॥

शुक्राङ्गारक-बुधबृहस्पति-शनैश्चरराहु-सोम-सहिता आदित्य-पुरोगाः सर्वेग्रहाः प्रीयन्ताम् । भगवान् नारायणः प्रीयताम् । भगवान् पर्जन्यः प्रीयताम् । भगवान् स्वामी महासेनः प्रीयताम् ।)

ब्राह्मणान् प्रार्थयामास प्राञ्जलिर्नतमस्तकः ।
यजमानः शिवो राजा पुण्याहार्थं पुनः पुनः ॥२१॥

(ब्राह्मं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकम् ।
देववृक्षोद्भवं नित्यं तत् पुण्याहं ब्रुवन्तु नः ॥
स्वस्ति याचाविना शाख्या पुण्यकल्याणवृद्धिदाः ।
नित्यं विनायकप्रीत्या तां तां स्वस्ति ब्रुवन्तु नः ॥
सागरस्य तु या वृद्धिर्महालक्ष्म्यादिभिः कृता ।
सम्पूर्णा चैव ऐन्द्रेया यां तां वृद्धिं ब्रुवन्तु नः ॥
पृथिव्या उद्धृता यान्तु यत् कल्याणं पुराकृतम् ।
ऋषिभिः सिद्धगन्धर्वैस्तत् कल्याणं ब्रुवन्तु नः ॥)

श्रीश्च वंशाभिवृद्धिश्चास्त्विवति गर्जन्त उच्चकैः ।
अभ्यसिञ्चन् शिवं विप्राः मन्त्रैः पौराणिकैः शिवैः ॥२२॥

(सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतिस्तथा ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥
बुद्धिर्लज्जा वपुःशान्तिः तुष्टिः कान्तिश्च मातरः ॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधो जीवः सितार्कजौ ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देव-दानव-गन्धर्वा यक्ष-राक्षस-पन्नगा ॥
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ॥
सरितः सागराः शैला तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥)

इत्थं समभिषिक्तोऽसौ कृतनीराजनक्रियः ।
आवाहयत् शिवैर्मन्त्रैः शिवः षोडशमातृकाः ॥२३॥

(हिमाद्रितनयां देवीं वरदां भैरवप्रियाम् ।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥
पद्मास्यां पद्मनयनां पद्मनाभोरसि स्थिताम् ।
जगत्प्रियां पद्मवासां पद्मामावाहयाम्यहम् ॥
दिव्यरूपां विशालाक्षीं शुचिकुण्डलधारिणीम् ।
रत्नयुक्ताद्यलङ्कारां शचीमावाहयाम्यहम् ॥
विश्वस्मिन् भूरिरक्ताब्जे जलनिर्झरसेविताम् ।
बुद्धिप्रबोधिनीं सौम्यां मेधामावाहयाम्यहम् ॥
जगत्सृष्टिकरीं धात्रीं देवीं प्रसवमातृकाम् ।
वेदगर्भां जगन्मायां सावित्रीं स्थापयाम्यहम् ॥
सर्वास्त्रधारिणीं देवीं सर्वाभरणभूषिताम् ।
सर्वदेवनतां ध्येयां विजयां स्थापयाम्यहम् ॥

Scanned by CamScanner

दैत्यक्षयकरीं देवीं देवानामभयप्रदाम् ।
त्रैलोक्यवन्दितां देवीं जयामावाहयाम्यहम् ॥
मयूरवाहिनीं देवीं खड्गशक्तिधनुर्धराम् ।
आवाहये देवसेनां तारकासुरघातिनीम् ॥
हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति ।
तां दिव्यरूपां वरदां स्वाहामावाहयाम्यहम् ॥
अग्निष्वात्ता पितृभ्यो या कव्यार्थं या प्रतिष्ठिता ।
पितॄणां तृप्तिदां देवीं स्वधामावाहयाम्यहम् ॥
विश्वस्मिन् मातृरूपेण स्थितां देवीं वरप्रदाम् ।
संस्तुतेव जगन्मातः शान्तामावाहयाम्यहम् ॥
सर्वहर्षकरीं देवीं भक्तानामभयप्रदाम् ॥
हर्षोत्फुल्लाक्षकमलां हृष्टिमावाहयाम्यहम् ॥
या पुष्णाति जगत् सर्वं निजदेहसमुद्भवैः ।
शाकैः रत्नैर्जलैश्चैव पुष्टिमावाहयाम्यहम् ॥
नरैराराधितां देवीं सदा सन्तोषशालिनीम् ।
प्रसादसुमुखीं देवीं तुष्टिमावाहयाम्यहम् ॥
पत्तने नगरे ग्रामे विपिने पर्वते गृहे ।
नानाजातिकुलेशानां देवीमावाहयाम्यहम् ॥
समीपे मातृवर्गस्य सर्वविघ्नहरं सदा ।
त्रैलोक्यपूजितं देवं गणेशं स्थापयाम्यहम् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥)

इति मातरमावाह्य नान्दीश्राद्धं समाप्य च ।
पौरोहित्याय वव्रेऽसौ वेदविज्ञं पुरोधसम् ॥२४॥

(धर्मस्य धौम्यो जनकस्य वामदेवो वसिष्ठस्य यथा रघूणाम् ।
पुरोहितो मे भव विप्रमुख्य पुरोहितत्वं मम संचिकीर्ष्यन् ॥)

अर्घ्यं च मधुपर्केण संपाद्य स पुरोधसे ।
ददौ काञ्चन-भूयिष्ठां दक्षिणां तुष्टिकारिणीम् ॥२५॥
ततः संप्रार्थयामास स राजर्षिः कृताञ्जलिः ।
राज्याभिषेकसादस्य-कर्म कर्तुं पुरोधसम् ॥२६॥

Scanned by CamScanner

दैत्यक्षयकरीं देवीं देवानामभयप्रदाम् ।
त्रैलोक्यवन्दितां देवीं जयामावाहयाम्यहम् ॥
मयूरवाहिनीं देवीं खड्गशक्तिधनुर्धराम् ।
आवाहये देवसेनां तारकासुरघातिनीम् ॥
हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति ।
तां दिव्यरूपां परमां स्वाहामावाहयाम्यहम् ॥
अग्निष्वाता पितृभ्यो या कव्यार्थे या प्रतिष्ठिता ।
पितॄणां तृप्तिदां देवीं स्वधामावाहयाम्यहम् ॥
विश्वस्मिन् मातृरूपेण स्थितां देवीं वरप्रदाम् ।
संस्तुतैव जगन्मातः शान्तामावाहयाम्यहम् ॥
सर्वहर्षकरीं देवीं भक्तानामभयप्रदाम् ॥
हर्षोत्फुल्लाक्षकमलां हृष्टिमावाहयाम्यहम् ॥
या पुष्णाति जगत् सर्वं निजदेहसमुद्भवैः ।
शाकै रत्नैर्जलैश्चैव पुष्टिमावाहयाम्यहम् ॥
नरैराराधितां देवीं सदा सन्तोषशालिनीम् ।
प्रसादसुमुखीं देवीं तुष्टिमावाहयाम्यहम् ॥
पत्तने नगरे ग्रामे विपिने पर्वते गृहे ।
नानाजातिकुलेशानां देवीमावाहयाम्यहम् ॥
समीपे मातृवर्गस्य सर्वविघ्नहरं सदा ।
त्रैलोक्यपूजितं देवं गणेशं स्थापयाम्यहम् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥)

इति मातरमावाह्य नान्दीश्राद्धं समाप्य च ।
पौरोहित्याय वव्रेऽसौ वेदविज्ञं पुरोधसम् ॥२४॥

(धर्मस्य धौम्यो जनकस्य वामदेवो वसिष्ठस्य यथा रघूणाम् ।
पुरोहितो मे भव विप्रमुख्य पुरोहितत्वं मम संचिकीर्ष्यन् ॥)

अर्घ्यं च मधुपर्केण संपाद्य स पुरोधसे ।
ददौ काञ्चन-भूयिष्ठां दक्षिणां तुष्टिकारिणीम् ॥२५॥
ततः संप्रार्थयामास स राजर्षिः कृताञ्जलिः ।
राज्याभिषेकसादस्य-कर्म कर्तुं पुरोधसम् ॥२६॥

(त्वं नो गुरुः पिता माता प्रभुस्त्वं च परायणम् ।
त्वत्प्रसादाच्च विप्रर्षे ! सर्वं मे स्यान्मनोगतम् ॥
आपद्विमोक्षणार्थाय कुरु यज्ञमतन्द्रितः ।
ऋत्विग्भिः सहितः शुद्धैः संयतैः सुसमाहितैः ॥
आचार्येणापि सहितः सादस्यं कुरु सुव्रत ।
आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥
अस्य यागस्य निष्पत्तौ भव संप्रार्थितो मया ।
सुप्रसन्नेन कर्तव्यं यज्ञकर्म यथोदितम् ॥)

ततो होतॄनृत्विजश्च विप्रांश्च जापकान् द्वारपालकान् ।
प्रत्येकमष्टसंख्याकान् स वव्रे क्रतुसिद्धये ॥२७॥
यथास्थानं स्थितान् सर्वानमून् वेदविदो द्विजान् ।
आर्त्विज्याय स राजर्षिः प्रार्थयामास भक्तितः ॥२८॥

(ऋग्वेदः पद्मपत्राक्षो गायनः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥
कातराक्षो यजुर्वेदस्त्र्यैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥
सामवेदस्तु पिङ्गाक्षो जाग्रतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥
बृहन्नेत्रो ह्यथर्वेदोऽनुष्टुभो रुद्रदैवतः ।
वैशंपायन विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥)

वृत्वा तदोपद्रष्टारं श्रद्धया सम्यगार्चयत् ।
षडङ्गवेदविदुषो मधुपर्केण तान् द्विजान् ॥२९॥
ततश्च बह्वृचैर्विप्रैर्याजुषाथर्वणैस्तथा ।
शिवराजाय दत्तानि विष्टराणि शुभानि च ॥३०॥
तेषूदग्रेषूपविश्य पवित्रेषु यथाक्रमम् ।
पादौ प्रक्षाल्य जग्राह मधुपर्कं यथाविधि ॥३१॥
ततश्च यजमानोऽसौ वृतानामग्रजन्मनाम् ।
हस्ते प्रत्येकमाबध्नात् कङ्कणं रक्तसूत्रकम् ॥३२॥
चतुर्वर्णास्ततोऽमात्या धृतकुण्डलमुद्रिकाः ।
राजहस्ते प्रत्यबध्नन् कङ्कणं रक्तसूत्रकम् ॥३३॥

Scanned by CamScanner

तदा विमोचिताः सर्वे बद्धाः कारागृहादिषु ।
शिवाज्ञया चालभन्त स्वाधिकारान् निराकृताः ॥३४॥
आचार्यश्च ततः शान्ति कुर्वन् वैनायिकीं खलु ।
ऋत्विग्भिः कारयामास स्वस्तिकान् पञ्च मङ्गलान् ॥३५॥
मध्यस्थे स्वस्तिके स्तृत्वा प्राग्ग्रीवोत्तरलोम च ।
रक्तमानडुहं चर्म श्रीपर्णीपीठसंयुतम् ॥
सम्यगाच्छादयामास कार्पासश्वेतवाससा ॥३६॥
कलशांश्चतुरो भद्रान् स्थापितान् स्वस्तिकेषु च ।
ह्रदोदकेन चापूर्य पूजयामास वारुणान् ॥३७॥
भद्रासनस्योत्तरस्यामम्बिकां च विनायकम् ।
आचार्यः पूजयामास जपन् मन्त्रौ श्रुतीरितौ ॥३८॥

(ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ।
सुभगायै विद्महे काममालिन्यै धीमहि ।
तन्नो गौरी प्रचोदयात् ॥)

ततस्तत्र व्योमकेशं पार्वतीं भीमजं तथा ।
वसुदेवं सोममर्कं मङ्गलं च बुधं गुरुम् ॥३९॥
शुक्रं शनैश्चरं राहुं स्कन्दं विष्णुं प्रपूज्य च ।
हुताशनं प्रतिष्ठाप्य हृद्यन्वाधानं व्यधीयत ॥४०॥
यजमानस्ततो लिप्तशिरस्कश्चन्दनादिभिः ।
भद्रासनसमासीनश्चकार स्वस्तिवाचनम् ॥४१॥
स्त्रीभिर्विहितमाङ्गल्यं जीवत्पतिसुतादिभिः ।
यजमानं तदाचार्योऽभ्यषिञ्चत् कलशाम्बुभिः ॥४२॥

(सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु सर्वदा ॥
एतद्वै पावनं स्नानं सहस्राक्षमृषिस्मृतम् ।
तेन त्वा शतधारेण पावमान्यः पुनन्त्विमाः ॥

Scanned by CamScanner

शक्रादिदशदिक्पाला ब्रह्मेशा: केशवादय: ।
आपस्ते घ्नन्तु दौर्भाग्यं शान्ति ददतु सर्वदा ॥
सुमित्र्या न आप ओषधय: सन्तु ।
दुर्मित्र्यास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥
समुद्रो गिरयो नद्यो मुनयश्च पतिव्रता: ।
दौर्भाग्यं घ्नन्तु ते सर्वे शान्ति यच्छन्तु सर्वदा ॥)

इत्येवमभिषिक्तस्य यजमानस्न मूर्धनि ।
आजुह्वे सार्षपं तैलं स्रुवेणौदुम्बरेण च ॥४३॥

(ॐ मिताय स्वाहा । ॐ सम्मिताय स्वाहा ।
ॐ शालाय स्वाहा । ॐ कटंकटाय स्वाहा ।
ॐ कूष्माण्डाय स्वाहा । ॐ राजपुत्राय स्वाहा ।)

कृत्वा त्यागं चरुं प्रायश्चित्तहोमं ततो नृप: ।
इन्द्रादिलोकपालेभ्यश्चरुशेषबलिं ददौ ॥४४॥

(इन्द्राय नम: । अग्नये नम: । यमाय नम: । निर्ऋतये नम: ।
(वरुणाय नम: । वायवे नम: । सोमाय नम: । ईशानाय नम: ।
ब्रह्मणे नम: । अनन्ताय नम: ।)

बलिं दत्वा नमोवाकमित्थं स्नात्वा नराधिप: ।
विनायकाम्बिकाभ्यां चोपहारं विविधं ददौ ॥४५॥
समन्त्रमर्घ्यं दत्वा च सदूर्वासर्षपाञ्जलिम् ।
स ताभ्यां दैवताभ्यां च प्रार्थयामास भूपति: ॥४६॥

(रूपं देहि जयं देहि यशो देहि द्विषो जहि ।
पुत्रं देहि धनं देहि सर्वकामांश्च देहि मे ॥)

तत: शेषोपहारं च शूर्पं सकुशमुद्वहन् ।
गत्वा चतुष्पथं मन्त्रैर्देवतेभ्यो ददौ बलिम् ॥४७॥

(बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा
मरुतश्चाश्विनौ रुद्रा: सुपर्णा: पन्नगा ग्रहा: ॥
असुरा यातुधानाश्च पिशाचा मातरोरगा: ।
शाकिन्यो यक्षवेताला योगिन्य: पूतना शिवा: ॥
जृम्भका सिद्धगन्धर्वा नागा विद्याधरा नगा: ।
दिक्पाला लोकपालाश्च ये च विघ्नविनायका: ॥

जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥)

ततो गत्वा गृहं, दत्वा ऋत्विग्भ्यो भूरिदक्षिणाम् ।
धृत्वा विभूतिमग्निं च विससर्प शिवो नृपः ॥४८॥

इत्थं हि शास्त्रविहितान् प्रथमाह्निकांस्तान् ।
सर्वान् विधीन् परिसमाप्य नितान्तभक्त्या ।
ऐन्द्रीं च शान्तिमपरेऽह्नि करिष्यमाणः
श्रीमानसेवत शिवो बत भूमिशय्याम् ॥४९॥

॥ इति श्रीशिवराज्योदये महाकाव्ये ‘ राज्याभिषेकारम्भो ’ नाम
६४ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ६५ तमः सर्गः ॥

शान्तिप्रयोगः

अथातः पञ्चगव्येन पूतमन्त्रोदकेन च ।
प्रोक्षिते मण्डपे रम्येऽलङ्कृते पुष्पतोरणैः ॥१॥
विधिवत् स्थापिते वह्नौ श्रौतमन्त्रैः समाहुते ।
विनायकेष्वर्चितेषु सेन्द्राणीषु यथाक्रमम् ॥२॥
चतुःकलशमध्यस्थचर्मण्यानडुहे शुभे ।
उपविष्टे शिवे विप्रैर्विहितं स्वस्तिवाचनम् ॥३॥
आखूत्कर–नदीकूल–कुलाल–गणिकाङ्गणात् ।
राजाङ्गणात् पुरद्वाराद् वाल्मीकाच्च मृदः क्रमात् ॥४॥
गोरोचनं गुग्गुलं च व्रीह्याद्यष्टादशैव तु ।
पद्मरागं चेन्द्रनीलं प्रवालं मौक्तिकं तथा ॥५॥
वैडूर्यमिति रत्नानि तथैव दधिसर्पिषी ।
निधाय तत्र चालन्यां विबभ्रुस्तां तु ऋत्विजः ॥६॥
यजमानशिरोदेशेऽभिषिषेच तथा गुरुः ।
चतुर्घटस्थैरम्भोभिः चालनीरन्ध्रनिर्गतैः ॥७॥
तत्र मन्त्राः–

(पवित्रं तु शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ताः ॥
येन देवा पवित्रेण आत्मानं पुनते सदा ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ताः ॥
या तेऽलक्ष्मीर्यया पाप्मा हृदये पार्श्वतोदरे ।
ऊर्वोरुपस्थे पाणौ च तामितो नाशायाम्यहम् ॥
या शिरसि ग्रीवायां च पाणी पादौ च सेवते ।
श्रोण्यां पृष्ठे च याऽलक्ष्मीस्तामितो नाशयाम्यहम् ॥
प्राचीं दिशमवधार्य इन्द्रं दैवतम् ऐन्द्रीं परिषदं
याः कन्या ये सिद्धाः ।
इन्द्रेण दत्ता औषध्यः आपो वरुणसम्मिताः
ताभिस्त्वामभिषिञ्चामि पावमानीः पुनन्तु त्वा ॥

Scanned by CamScanner

दक्षिणां दिशमवधार्य यमं दैवतं याम्यीं परिषदं
या: कन्या ये सिद्धाः ।
यमेन दत्ता औषधय: आपो वरुणसम्मिताः
ताभिस्त्वामभिषिञ्चामि पावमानीः पुनन्तु त्वा ।।
प्रतीचीं दिशमवधार्य वरुणं दैवतं वारुणीं परिषदं
या: कन्या: ये सिद्धाः ।
सोमेन दत्ता औषधय: आपो वरुणसंमिताः
ताभिस्त्वामभिषिञ्चामि पावमानीः पुनन्तु त्वा ।।
उदीचीं दिशमवधार्य सोमं दैवतं सौमीं परिषदं
या: कन्या ये सिद्धाः ।
सोमेन दत्ता औषधयः आपो वरुणसंमिताः
ताभिस्त्वामभिषिञ्चामि पावमानीः पुनन्तु त्वा ।।
ध्रुवां दिशमवधार्य विष्णु दैवतं वैष्णवीं परिषदं
या: कन्या: ये सिद्धाः ।
विष्णुना दत्ता औषधय: आपो वरुणसंमिताः
ताभिस्त्वामभिषिञ्चामि पावमानीः पुनन्तु त्वा ।।
उर्ध्वां दिशमवधार्य बृहस्पतिं दैवतं बार्हस्पत्यां परिषदं
या: कन्या ये सिद्धाः ।
बृहस्पतिना दत्ता औषधय: आपो वरुणसम्मिताः
ताभिस्त्वामभिषिञ्चामि पावमानीः पुनन्तु त्वा ।)

गौरसर्षपतैलं च गोघृतं च महीपतेः ।
ताम्रस्रुवेण चाजुह्वे कुशान्तर्हितमूर्धनि ।।९।।

(तत्र मन्त्राः—शालकटंकटाय स्वाहा । कूष्माण्ड-
राजपुत्राय स्वाहा । देवयजनाय स्वाहा ।)

ततश्च माषचूर्णेन कृतस्नानो नराधिपः ।
इन्द्राणीं प्रार्थयामास कामानात्मशुभंकरान् ।।९।।

(भगवति ! भगं मे देहि । धनवति ! धनं मे देहि ।
यशस्विनि ! यशो मे देहि । सौभाग्यवति ! सौभाग्यं मे देहि ।
पुत्रवति ! पुत्रान् मे देहि । सर्ववति ! सर्वान् कामान् मे देहि ।)

(सर्वभूतेश्वरीं देवीं शरणं त्वायमागतः ।
सौभाग्यकामः सुभगे जहि मह्यं विनायकान् ॥)

आचार्यश्च ततो मत्स्यप्रमुखं बलिमुत्तमम् ।
धानामुद्गादि-संयुक्ते कलशे कलशे ददौ ॥१०॥
संवर्धयेमं राजाभिषेकं शिवर्मणः ।
नमोवाकं समभ्यर्थि चेति प्रति विनायकम् ॥११॥

(नमस्तेऽस्तु भगवन् शतरश्मे तमोनुद ।
जहि मे देव दौर्भाग्यं मां सौभाग्येन संसृज ॥)

इति सूर्यमुपस्थाय ब्राह्मणेभ्यः शिवो ददौ ।
गोसुवर्णादिभूयिष्ठां दक्षिणां तुष्टिकारिणीम् ॥१२॥
ततश्चैशानयागार्थं कुण्डेऽग्निं स्थापयन् द्विजः ।
ईशानपीठे प्रतिमामैशानीं समपूजयत् ॥१३॥
इत्थं द्वितीयदिवसे प्रसमाप्य भक्त्या ।
शान्तिप्रयोगमखिलं विधिवत् तमैन्द्रम् ।
सन्तोष्य च द्विजगणान् बहुदक्षिणाभिः
यातः शिवः स्वजननीपदवन्दनाय ॥१४॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'शान्तिप्रयोगः' नाम ६५ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ८६ तमः सर्गः ॥

ग्रहयागः

अथो तृतीये दिवसे ह्यैन्द्रीशान्त्यङ्गपूर्तये ।
ग्रहयागार्थमाचार्यः स्थापयामास पावकम् ॥१॥
ग्रहानावाह्य पीठे च स प्रत्येकं समर्पयत् ।
छत्रोपानत्पादपीठान् मन्त्रघोषैर्हिरण्मयान् ॥२॥

(तत्र मन्त्राः–
यं वहन्ति शोणकर्णाः प्रतिलोमा वाजिनः ।
तमहं सर्वतेजोमयमादित्यमावाहयामि ॥
यं वहन्ति हंसवर्णा अनुलोमा वाजिनः ।
तमहं द्विजैराप्यायमान सोममावाहयामि ॥
यस्य रक्तरूपं रक्तानुलेपनश्च यः ।
तमहं रक्तवर्णाभं भौममावाहयामि ॥
यस्य पीतरूपं पीतानुलेपनश्च यः ।
तमहं पीतवर्णाभं बुधमावाहयामि ॥
यश्चैवाङ्गिरसः पुत्रो देवानां च पुरोहितः ।
तमहं हिरण्यवर्णाभं बृहस्पतिमावाहयामि ॥
यस्य शुक्लरूपं शुक्लानुलेपनश्च यः ।
तमहं शुक्लवर्णाभं शुक्रमावाहयामि ॥
यस्यायसं रूपमायसी यस्य प्रकृतिः ।
तमहमादित्यजं नित्यं शनिमावाहयामि ॥
यस्य कृष्णरूपं कृष्णानुलेपनश्च यः ।
तमहं कृष्णवर्णाभं राहुमावाहयामि ॥
यस्य दीर्घा शिखा मुखं च परिमण्डलम् ।
तमहं ब्रह्मणः पुत्रं केतुमावाहयामि ॥)

वामे भागे रुद्रमुख्या नव ता अधिदेवताः[1] ।
दक्षिणे चाग्निमुख्यास्ता नव प्रत्यधिदेवताः[2] ॥३॥

---

१ अधिदेवताः – रुद्रः, उमा, विष्णुः, ब्रह्मा, इन्द्रोः, यमः, कालः, चित्रगुप्तः ।

२ प्रत्यधिदेवताः – अग्निः, आपः, भूमिः, नारायणः, इन्द्रः, इन्द्राणी प्रजापतिः, सर्पः, ब्रह्मा ।

Scanned by CamScanner

(दक्षिणे चाग्निमुख्यास्ता नव प्रत्यधिदेवताः)

विधे राज्याभिषेकस्य निर्विघ्नपरिपूर्तये ।
प्रोद्घोषितैर्वेदमन्त्रैः समावाह्य प्रपूजिताः ॥४॥
नमोतमाख्यैः प्रथितैर्मन्त्रैः पौराणिकैः शुभैः ।
आवाहिताः कृत्तिकाद्या दिव्या नक्षत्रदेवताः ॥५॥

ते च मन्त्राः –

(आवाहयिष्यामि शुभां कृत्तिकां देवपूजिताम् ।
एहि साधारणे देवि ज्येष्ठे दक्षसुते शुभे ॥
आवाहयिष्यामि वरदां रोहिणीं चन्द्रवल्लभाम् ।
एहि रोहिणि धर्मज्ञे ध्रुवकर्मसु शोभने ॥
आवाहयिष्यामि धर्मज्ञामन्धकां शशिवल्लभाम् ।
एहि मे अन्धके देवि मृदुकर्मसुशोभने ॥
आर्द्रामावाहयिष्यामि नक्षत्रं चारुसंज्ञकम् ।
एह्यार्द्रे चारुसर्वाङ्गि दारुणे रुद्रसम्मिते ॥
ऋक्षमावाहयिष्यामि धर्मज्ञं तु पुनर्वसुम् ।
पुनर्वसो समागच्छ चरकर्मप्रसाधक ॥
पुष्यमावाहयिष्यामि नक्षत्रं क्षिप्रसंज्ञकम् ।
एहि पुष्य महाभाग पोषं वर्धय सर्वतः ॥
आवाहयिष्याम्याश्लेषां भक्तानां श्रीविवर्धिनीम् ।
आश्लेषे त्वमिहाभ्येहि दारुणे विजयप्रदे ॥
मघामावाहयिष्यामि उग्रनक्षत्रमञ्जसा ।
एहि मे सुभगे देवि सर्वार्तिविनिषूदने ॥
ऋक्षमावाहयिष्यामि पूर्वाफाल्गुनिसंज्ञिके ।
एहि मे सुभगे देवि उग्रकर्मप्रसाधिके ॥
ऋक्षमावाहयिष्यामि उत्तराफाल्गुनिं शुभाम् ।
एहि त्वं सुभगे देवि ध्रुवे सर्वाङ्गसुन्दरि ॥
हस्तमावाहयिष्यामि सावित्रं क्षिप्रमञ्जसा ।
एहि सावित्र धर्मज्ञ भक्तानां पापनाशन ॥
चित्रामावाहयिष्यामि चित्ररूपां मनोहराम् ।
एहि मे वरदे चित्रे मृदुकर्मप्रसाधिके ॥
स्वातिमावाहयिष्यामि नित्यमुत्तरमार्गगाम् ।
देवि स्वाति त्वमेभ्येहि चरकर्मसुशोभने ॥

Scanned by CamScanner

ऋक्षमावाहयिष्यामि ह्यनुराधां वरप्रदाम् ।
अनुराध त्वमभ्येहि मृदुकर्मसुशोभने ॥
ज्येष्ठामावाहयिष्यामि नक्षत्रं शक्रदैवतम् ।
ज्येष्ठे देवि त्वमभ्येहि दारुणे चारुलोचने ॥
मूलमावाहयिष्यामि नक्षत्रं दारुणं महत् ।
एहि मूल महाभाग भक्तानामभयप्रद ॥
ऋक्षमावाहयिष्यामि पूर्वाषाढेति संज्ञकम् ।
एहि त्वमुग्रे वरदे आषाढे पूर्वसंज्ञके ॥
ऋक्षमावाहयिष्यामि उत्तराषाढसंज्ञकम् ।
उत्तरे त्वं समभ्येहि आषाढे ध्रुवसाधके ॥
ऋक्षमावाहयिष्यामि यदिहाभिजिदुच्यते ।
एहि धिष्ण्य वरिष्ठाद्य क्षिप्रकर्मप्रसाधक ॥
ऋक्षमावाहयिष्यामि श्रवणं सर्वकामदम् ।
श्रवणत्वमिहाभ्येहि चरकर्मप्रसाधक ॥
धनिष्ठामावाहयिष्यामि नक्षत्रं शशिवल्लभम् ।
धनिष्ठे त्वमिहाभ्येहि चरकर्मप्रसाधके ॥
ऋक्षमावाहयिष्यामि नाम्ना शतभिषां शुभाम् ।
आगच्छ त्वं शतभिषे चरकर्मसुशोभने ॥
ऋक्षमावाहयिष्यामि पूर्वाभाद्रपदां महत् ।
एहि भाद्रपदे पूर्वे उग्रकर्मप्रसाधके ॥
ऋक्षमावाहयिष्यामि रेवतीं चारुदर्शनाम् ।
एहि रेवति धर्मज्ञे मृदुकर्मसुशोभने ॥
ऋक्षमावाहयिष्यामि क्षिप्रमश्विनिसंज्ञकम् ।
एह्यश्विनि महाभागे वरदे कामदायिनि ।
ऋक्षमावाहयिष्यामि चोग्रं भरणिसंज्ञकम् ।
एहि त्वं देवि भरणि सुभगे चारुदर्शने ॥)

ततश्चाष्टौ लोकपालान् षड् गणेशादिदवतान् ।
समावाह्य च संपूज्य ग्रहार्थ हवनं कृतम् ॥६॥
हुत्वाधिदेवताप्रीत्यै श्रौतमन्त्रैश्च पावनैः ।
आचार्येण विधिज्ञेन नक्षत्रहवनं कृतम् ॥
दिक्पालांश्च ततो वास्तोष्पतीश्चान्याश्च देवताः ।
हवनैरनिसन्तोष्य प्रार्थयामास वै द्विजः ॥८॥

ग्रहाणां तारकाणां च प्रीत्यर्थं भूरिदक्षिणाम् ।
समर्प्य ग्रहयज्ञोऽसौ समाप्तिं प्रत्यनीयत ॥९॥
दिवसोऽन्यश्च नवमीसहितो भौमवासरः ।
अतः स्थगित एवासीदभिषेकमहोत्सवः ॥१०॥
★ पञ्चमेऽहनि नक्षत्रयागः शान्त्यङ्गपूर्तये ।
प्रवर्त्तितो यथाशास्त्रमाचार्येण मनीषिणा ॥११॥
यज्ञकुण्डे प्रतिष्ठाप्य विधिवज्जातवेदसम् ।
तदग्रपीठेऽपूज्यन्त नक्षत्रप्रतिमाः शुभाः ॥१२॥
नक्षत्रप्रीतये दत्त्वा घृताद्या बहुदक्षिणाः ।
नक्षत्रप्रतिमाः सर्वा आचार्याय निवेदिताः ॥१३॥
★ **षष्ठेथ दिवसे** रात्रौ नैर्ऋत्यां दिशि मण्डपे ।
अग्निं नैर्ऋतियागार्थं प्रतिष्ठापितवान् द्विजः ॥१४॥
अग्नेर्दक्षिणतो मूर्तिं मृन्मयीं रासभस्थिताम् ।
उदङ्मुखीं कृष्णवस्त्रां कृष्णपुष्पैरपूज्यत् ॥१५॥
निवेदितं नैर्ऋतयेऽपक्वमांससुरादिकम् ।
हुतं धाना-बाण-पुंख-मांस-धेनुखुरादिकम् ।
शर्कराचरुहोमान्ते खर्परं वह्निपूरितम् ।
मृत्तिकारासभस्याङ्गे कृष्णवासा नरोऽभिनत् ॥१७॥
ततः स्नातः शुभ्रवासा यजमानः समर्पयत् ।
गो-कांस्य-वस्त्रबहुलां दक्षिणामग्रजन्मने ॥१८॥
★ सप्तमेऽहनि चाचार्यः कुम्भेनानीय जीवनम् ।
तेन सत्पञ्चरत्नेन सम्भारप्रोक्षणं व्यधात् ॥१९॥
संस्थाप्य कुम्भं गोचर्मण्यग्नेरग्रत उज्ज्वलम् ।
कौङ्कुमाब्जे-श्वेतवस्त्रे देवेन्द्रप्रतिमां व्यधात् ॥२०॥
इन्द्रमावाह्य सम्पूज्योपचारैः षोडशैरपि ।
पूजान्ते च ध्वजच्छत्रचामरादीन् न्यवेदयत् ॥२१॥
कांस्यपात्रे ततो मन्त्रैरावाह्याम्बुनि चौषधीः ।
तेन त्रिरग्निं सम्प्रोक्ष्य घृतेन हवनं कृतम् ॥२२॥
सप्तधान्यैः समित्काष्ठैर्नानावृक्षसमुद्भवैः ।
समन्त्रघोषमाजुह्वे वैताने जातवेदसि ॥२३॥
शरावे कुम्भसविधे कुशमूलमणिस्तदा ।
सुवर्णसूत्रनिर्बद्धः समास्थाप्यत मङ्गलः ॥२४॥
मण्डपाद्बहिराकीर्णाः सिकता दिक्षु सर्वतः ।
स्थापितास्तत्र पाषाणा विदधे हवनं पुनः ॥२५॥

रक्षोभ्यो नम इत्युक्त्वा सक्तुना सहितं बलिः
क्षिप्तं दक्षिणतो विप्रैर्यातुधानप्रशान्तये ॥२६॥
ततोऽभिषेकसन्मन्त्रैः कलशस्योदकेन च ।
यजमानं सपत्नीकमभ्यसिञ्चद् द्विजोत्तमः ॥२७॥
कुशमूलमणिं तं च दर्भमध्ववतमुत्तमम् ।
शिवराजभुजे विप्रो निर्बबन्धाभिमन्त्रितम् ॥२८॥

तत्र मन्त्राः – (अथर्व. १९–२८–१।१०)

(ॐ इमं बध्नामि ते मणिं दीर्घायुत्वाय तेजसे ।
दर्भं सपत्नदम्भनं द्विषतस्तपनं हृदः ॥
द्विषतास्तापयन् हृदः शत्रूणां तापयन् मनः ।
दुर्हार्दः सर्वांस्त्वं दर्भ घर्म इवाभितापयन् ॥
घर्म इवाभिपतन् दर्भ द्विषतो निपतन्मणे ।
हृदः सपत्नानां भिन्धीन्द्र इव विरुजं बलम् ॥
भिन्धि दर्भ सपत्नानां हृदयं द्विषतां मणे ॥
उद्यन्त्वचमिव भूम्याः शिर एषां विपातय ।
भिन्धि दर्भ सपत्नान् मे भिन्धि मे पृतनायतः ।
भिन्धि मे सर्वान् दुर्हार्दान् भिन्धि मे द्विषतो मणे ॥
छिन्धि दर्भ सपत्नान् मे छिन्द्धि मे पृतनायतः ।
छिन्द्धि मे सर्वान् दुर्हार्दान् छिन्द्धि मे द्विषतो मणे ॥
वृश्च दर्भ सपत्नान् मे वृश्च मे पृतनायतः ।
वृश्च मे सर्वान् दुर्हार्दान् वृश्च मे द्विषतो मणे ॥
कृन्त दर्भ सपत्नान् मे कृन्त मे पृतनायतः ।
कृन्त मे सर्वान् दुर्हार्दान् कृन्त मे द्विषतो मणे ॥
पिंश दर्भ सपत्नान् मे पिंश मे पृतनायतः ।
पिंश मे सर्वान् दुर्हार्दान् पिंश मे द्विषतो मणे ॥
विध्य दर्भ सपत्नान् मे विध्य मे पृतनायतः ।
विध्य मे सर्वान् दुर्हार्दान् विध्य मे द्विषतो मणे ॥

अथर्व –१९–२९–१।९)

ॐ निक्ष दर्भ सपत्नान् मे निक्ष मे पृतनायतः ।
निक्ष मे सर्वान् दुर्हार्दान् निक्ष मे द्विषतो मणे ॥
तृन्धि दर्भ सपत्नान् मे तृन्धि मे पृतनायतः
तृन्धि मे सर्वान् दुर्हार्दान् तृन्धि मे द्विषतो मणे ॥

Scanned by CamScanner

रक्षोभ्यो नम इत्युक्त्वा सक्तुना सहितं दधिः
  क्षिप्तं दक्षिणतो विप्रैर्यातुधानप्रशान्तये ॥२६॥
ततोऽभिषेकसन्मन्त्रैः कलशस्योदकेन च ।
  यजमानं सपत्नीकमभ्यसिञ्चद् द्विजोत्तमः ॥२७॥
कुशमूलमणिं तं च दधिमध्ववक्तमुत्तमम् ।
  शिवराजभुजे विप्रो निर्बबन्धाभिमन्त्रितम् ॥२८॥

तत्र मन्त्राः – (अथर्व. १९–२८–१।१०)

(ॐ इमं बध्नामि ते मणिं दीर्घायुष्ट्वाय तेजसे ।
  दर्भं सपत्नदम्भनं द्विषतस्तपनं हृदः ॥
द्विषतास्तापयन् हृदः शत्रूणां तापयन् मनः ।
  दुर्हृदः सर्वास्त्वं दर्भ घर्म इवाभितापयन् ॥
घर्म इवाभिपतन् दर्भ द्विषतो निपतन्मणे ।
  हृदः सपत्नानां भिन्धीन्द्र इव विरुजं बलम् ॥
भिन्धि दर्भ सपत्नानां हृदयं द्विषतां मणे ॥
  उद्यन्त्वचमिव भूम्याः शिर एषां विपातय ।
भिन्धि दर्भ सपत्नान् मे भिन्धि मे पृतनायतः ।
  भिन्धि मे सर्वान् दुर्हार्दान् भिन्धि मे द्विषतो मणे ॥
छिन्धि दर्भ सपत्नान् मे छिन्द्धि मे पृतनायतः ।
  छिन्द्धि मे सर्वान् दुर्हार्दान् छिन्द्धि मे द्विषतो मणे ॥
वृश्च दर्भ सपत्नान् मे वृश्च मे पृतनायतः ।
  वृश्च मे सर्वान् दुर्हार्दान् वृश्च मे द्विषतो मणे ॥
कृन्त दर्भ सपत्नान् मे कृन्त मे पृतनायतः ।
  कृन्त मे सर्वान् दुर्हार्दान् कृन्त मे द्विषतो मणे ॥
पिंश दर्भ सपत्नान् मे पिंश मे पृतनायतः ।
  पिंश मे सर्वान् दुर्हार्दान् पिंश मे द्विषतो मणे ॥
विध्य दर्भ सपत्नान् मे विध्य मे पृतनायतः ।
  विध्य मे सर्वान् दुर्हार्दान् विध्य मे द्विषतो मणे ॥

अथर्वं –१९–२९–१।९)

ॐ निक्ष दर्भ सपत्नान् मे निक्ष मे पृतनायतः ।
  निक्ष मे सर्वान् दुर्हार्दान् निक्ष मे द्विषतो मणे ॥
तृन्धि दर्भ सपत्नान् मे तृन्धि मे पृतनायतः
  तृन्धि मे सर्वान् दुर्हार्दान् तृन्धि मे द्विषतो मणे ॥

Scanned by CamScanner

मृण दर्भ सपत्नान् मे मृण मे पृतनायतः ।
मृण मे सर्वान् दुर्हार्दान् मृण मे द्विषतो मणे ।।
मन्थ दर्भ सपत्नान् मे मन्थ मे पृतनायतः ।
मन्थ मे सर्वान् दुर्हार्दान् मन्थ मे द्विषतो मणे ।।
पिण्ढि दर्भ सपत्नान् मे पिण्ढि मे पृतनायतः ।
ओष मे सर्वान् दुर्हार्दान ओष मे द्विषतो मणे ।।
दह दर्भ सपत्नान् मे दह मे पृतनायतः ।
दह मे सर्वान् दुर्हार्दान् दह मे द्विषतो मणे ।।
जहि दर्भ सपत्नान् मे जहि मे पृतनायतः ।
जहि मे सर्वान् दुर्हार्दान् जहि मे द्विषतो मणे ।
(अथर्व १९–३०–१।५)
ॐ यत् ते दर्भ जरामृत्युः शतं वर्मसु वर्म ते ।
तेनेमं वर्मिणं कृत्वा सपत्नान् जहि वीर्यैः ।।
शतं ते दर्भ वर्माणि सहस्रं वीर्याणि ते ।
तमस्मै विश्वे त्वां देवा जरसे भर्तवा अदुः ।
त्वामाहुर्देववर्म त्वां दर्भ ब्रह्मणस्पतिम् ।
त्वामिन्द्रस्याहुर्वर्म त्वं राष्ट्राणि रक्षसि ।।
सपत्नक्षयणं दर्भ द्विषस्तपनं हृदः ।
मणिं क्षत्रस्य वर्धनं तनूपानं कृणोमि ते ।।
यत् समुद्रो अभ्यक्रन्दत् पर्जन्यो विद्युता सह ।
ततो हिरण्ययो बिन्दुस्ततो दर्भो अजायत ।।)

परिधाय नवे वस्त्रे हुत्वा पूर्णाहुतिं ततः ।
ऋत्विग्भ्यो दक्षिणां दत्वा सहस्रं भोजिता द्विजाः ।।२९।।
सप्ताहमेवमुचितं विधिमागमोक्तम्
आचार्यवर्यवचनान्यनुसृत्य सम्यक् ।
कृत्वा ग्रहर्क्षसुरयक्षगणस्य तुष्टयै
सज्जोऽभिषेकविधये शिवराज आसीत् ।।३०।।

।। इति श्रीशिवराज्योदये महाकाव्ये ग्रहयागो नाम ६६ तमः सर्गः समाप्तः ।।

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ६७ तमः सर्गः ॥

राज्याभिषेकारम्भः

सप्तमेऽहनि सन्ध्यायां शुभायां शुक्रवासरे ।
आरब्धो विधिवद् राजाभिषेकाङ्गमहोत्सवः ॥१॥
कृत्वादौ श्रीगणेशस्य पूजन स्वस्तिवाचनम् ।
मातृकापूजनान्ते च वसोद्धाराभिपूजनम् ॥२॥
ततश्च नान्दीश्राद्धान्ते श्रीनारायणपूजनम् ।
षोडशैरुपचारैश्च कृत्वाऽऽज्याहुतिरर्पिता ॥३॥
भूमावास्तीर्णदर्भायां व्रतस्थः शिवभूपतिः ।
सुष्वाप रात्रौ प्रासादे निध्यायन् परमेश्वरम् ॥४॥
ततोऽन्येद्युस्त्रयोदश्यां प्रभाते शनिवासरे ।
सर्वमङ्गलमाङ्गल्ये साधुवृन्दप्रतीक्षिते ॥५॥
सांवत्सरिकवर्येण ऋत्विग्भिश्च पुरोधसा ।
सार्धं मण्डपमायातः सपत्नीकः शिवप्रभुः ॥६॥
तदोच्चकैरवाद्यन्त प्रहृष्टैस्तूर्यवादकैः ।
तथा मङ्गलतूर्याणि दिगन्ताः प्रतिदध्वनुः ॥७॥
सम्पूज्य मण्डपं भव्य नवकुण्डी-सुशोभितम् ।
उच्छ्रितोऽभ्यर्चितो भक्त्या काषायो भगवद्ध्वजः ॥८॥
ततोऽभितो महावेदीं चतुर्दिक्षु चतुश्चतुः ।
सौवर्णा राजतास्ताम्रा मार्दा निदधिरे घटाः ॥९॥
पूर्वतो घृत-पूर्णश्चोत्तरतो मधुपूरितः ।
दक्षिणातो दुग्धपूर्णः प्रत्यग् दधिभृतो घटः ॥१०॥
पूरिताः सलिलैः पुण्यैर्घटास्ते द्वादशेतरे ॥
सर्वेऽप्यासन् गन्ध-माल्य-चूतपल्लव-मण्डिताः ॥११॥
क्षिप्ताः सजलकुम्भेषु शतधौषधयः शुभाः ।
पञ्चधा रत्नधान्यानि सप्तधा मृत्तिकास्तथा ॥१२॥
वृषशृङ्गं हस्तिदन्तस्तथा गोरोचनोपलम् ।
मुरारेणुर्देवदारुः कुंकुमं राजसर्षपः ॥१३॥
आसन्द्यौदुम्बरी वेद्यां प्रशाखा चमसस्तथा ।
घृतं-मधु-दधि-स्वर्णं स्थापितं पावनोदकम् ॥१४॥
पुण्याभिषेकशालायामुदग् भद्रासनं ततः ।
पुण्याभिषेकशालायामुदग् भद्रासनं ततः ।

पुण्यापगाम्बुपूर्णेषु मन्त्रितेषु घटेषु च ।
स्थापिताऽभून्महावेद्यां हुताशः सनवग्रहः ॥१६॥
ततश्च कलशो हैमः पञ्च पल्लवमण्डितः ।
वस्त्राभिवेष्टितस्तत्र स्थापितः पात्रसन्निधौ ॥१७॥
ऋत्विजश्च ततः कृत्वा भूसंस्कारान् स्वकुण्डके ।
स्थापयामासुराचार्यकुण्डस्थाग्नि यथाविधि ॥१८॥
यजमानेन मान्येन द्रव्यत्यागे ततः कृते ।
ऋत्विजश्चक्रिरे सर्वप्रधानं होममादरात् ॥१९॥
औदुम्बरीयाः समिधस्तदाज्येन समं हुताः ।
अष्टोत्तरशतं जप्त्वा गायत्रीमन्त्रमुच्चकैः ॥२०॥
तदा द्विजवराः सर्वे वेदमन्त्रान् पृथग्विधान् ।
जगर्जुः स्वस्वशाखीयानाजुह्वाना मुहुर्मुहुः ॥२१॥
जञ्जपूकाः भृशं जेपुर्मन्त्रान् दैवततोषणान् ।
उच्चैर्द्वारजपं चक्रुर्द्वारपालाः सहस्रशः ॥२२॥
रात्रिसूक्तं च रौद्रं च पवमानं सुमङ्गलम् ।
अजपन् पौरुषं सूक्तं पूर्वतो बह्वृचः पृथक् ॥२३॥
शाक्तं रौद्रं च सौम्यं च कौष्माण्डं जातवेदसम् ।
अजपन् सौरसूक्तं ते दक्षिणेन यजुर्विदः ॥२४॥
शैशवं पञ्चनिधनं गायत्रं ज्येष्ठसाम च ।
वामदेव्यं बृहत्सौम्यं रौरवं सरथन्तरम् ॥२५॥
गवां व्रतं विकीर्णं च रक्षोदन यशस्तथा ।
वैराज्यं पौरुषं सूक्तं सौपर्णं रुद्रसंहिताम् ।
अगायन् सामगाः सर्वे पश्चिमद्वारमाश्रिताः ॥२६॥
आथर्वणांश्चोत्तरतः शांतिकं पौष्टिकं तथा ।
अजपन् मनसा देवमाश्रित्य वरणं प्रभुम् ॥२७॥
अजपन् निजशाखीय-श्रौतसूक्तानि सर्वतः ।
द्वारपाला द्वारदेशे यथायोगं नियोजिताः ॥२८॥
श्रीसूक्तं पवमानं च सोमसूक्तं सुमङ्गलम् ।
शान्त्यध्यायं चेन्द्रसूक्तं रक्षस्व चेति बह्वृचौ ॥२९॥
दक्षिणे तु द्वारपालौ रुद्रात् पुरुषसूक्तकम् ।
श्लोकाध्यायं शुक्रियं च मङ्गलाध्यायमेव च ॥३०॥
वामदेव्यं बृहत्साम ज्येष्ठसाम रथन्तरम् ।
तथा पुरुषसूक्तं च रुद्रसूक्तमतः परम् ॥३१॥

Scanned by CamScanner

आज्यदोहानि सामानि शांतिकाध्यायमेव च ॥
भारुण्डानि च सामानि पश्चिमे सामवेदिनो ॥३२॥
अथर्वाङ्गिरसं नीलरुद्रं चैवापराजितम् ।
देवीं च मधुसूक्तं च रोधसं शान्तिकं तथा ॥
आथर्वणो द्वारपालौ पेठतुश्चोत्तरे स्थितौ ॥३३॥
ततश्च बलिदानान्ते कुण्डेषु सकलेष्वपि ।
हुत्वा पूर्णाहुतिं राजाभिषेकः सम्प्रवर्तितः ॥३४॥
तदाभिषेकशालायां तैलैश्चूर्णैः सुगन्धिभिः ।
सामगेषु प्रगायत्सु शिवस्याङ्गं समञ्जितम् ॥३५॥
सुस्नापिते कवोष्णेन जलेन च ततः शिवे ।
शुक्लाम्बरधरे मृद्भिः संस्कारं विदधौ द्विजः ॥३३॥
नगाग्रस्था हि मून्मूर्ध्नि वल्मीकस्था च कर्णयोः ।
शिवालयस्था वदने ग्रीवायामिन्द्रसद्मगा ॥३७॥
नृपाजिरस्था हृदये करिदन्तोद्धृता भुजे ।
भुजङ्गमोद्धृता पृष्ठे कुक्षौ संगमसंस्थिता ॥३८॥
नदीकूलस्थिता पार्श्वे वृषशृङ्गोद्धृता तथा ।
वेश्यागारगता कट्यां गजस्थानस्थिता भ्रुवोः ॥३९॥
धेनुस्थानस्थिता जान्वोरश्वस्थानाच्च जङ्घयोः ।
रथचक्रोद्धृता चाङ्घ्र्योःसर्वाङ्गे स्वर्णदीगता ॥४०॥
इत्थं शिवस्य गात्रेषु लिप्त्वा नानाविधा मृदः ।
गोमूत्रं गोमयं गव्यं क्षीरं दधि घृतं तथा ॥
कुशोदकं च सर्वाङ्गे मन्त्रघोषैः समञ्जितम् ॥४०॥
ततः स्नातानुलिप्तश्च शुक्लवासाः शुचिस्मितः ।
सोष्णीशोऽलङ्कृतो राजा मण्डप प्रत्यनीयत ॥४२॥
तत्र वेदीस्थितासन्दीमास्तीर्णां व्याघ्रचर्मणा ।
साम्राज्याय च भौज्याय स्वराज्याय तथैव च ॥
वैराज्यपारमेष्ठायाय राज्याय च तथा खलु ॥
महाराज्याधिपत्याय पूर्वं दक्षिणजानुना ।
वामेन जानुना पश्चादारुरोह शिवप्रभुः ॥४३॥
ततः स प्रार्थयामास पुरोधोभ्यो नराधिपः ।
राज्याभिषेकविधये धर्मराज्यप्रवर्तकः ॥४४॥

• (प्राच्यां मामभिषिञ्चन्तु वसवस्तेजसे श्रिये ।
• याम्यायामभिषिञ्चन्तु मां रुद्रा विजयाय च ॥

Scanned by CamScanner

आज्यदोहानि सामानि शांतिकाध्यायमेव च ॥
भारुण्डानि च सामानि पश्चिमे सामवेदिनौ ॥३२॥
अर्थवाङ्गिरसं नीलरुद्रं चैवापराजितम् ।
देवीं च मधुसूक्तं च रोधसं शान्तिकं तथा ॥
आथर्वणौ द्वारपालौ पेठतुश्चोत्तरे स्थितौ ॥३३॥
ततश्च बलिदानान्ते कुण्डेषु सकलेष्वपि ।
हुत्वा पूर्णाहुतिं राजाभिषेकः सम्प्रवर्तितः ॥३४॥
तदाभिषेकशालायां तैलैश्चूर्णैः सुगन्धिभिः ।
सामगेषु प्रगायत्सु शिवस्याङ्गं समञ्जितम् ॥३५॥
सुस्नापिते कवोष्णेन जलेन च ततः शिवे ।
शुक्लाम्बरधरे मृद्भिः संस्कारं विदधौ द्विजः ॥३३॥
नगाग्रस्था हि मृन्मूर्ध्नि वल्मीकस्था च कर्णयोः ।
शिवालयस्था वदने ग्रीवायामिन्द्रसद्मगा ॥३७॥
नृपाजिरस्था हृदये करिदन्तोद्धृता भुजे ।
भुजङ्गमोद्धृता पृष्ठे कुक्षौ संगमसंस्थिता ॥३८॥
नदीकूलस्थिता पार्श्वे वृषशृङ्गोद्धृता तथा ।
वेश्यागारगता कट्यां गजस्थानस्थिता भ्रुवोः ॥३९॥
धेनुस्थानस्थिता जान्वोरश्वस्थानाच्च जङ्घयोः ।
रथचक्रोद्धृता चाङ्घ्र्योःसर्वाङ्गे स्वर्णदीगता ॥४०॥
इत्थं शिवस्य गात्रेषु लिप्त्वा नानाविधा मृदः ।
गोमूत्रं गोमयं गव्यं क्षीरं दधि घृतं तथा ॥
कुशोदकं च सर्वाङ्गे मन्त्रघोषैः समञ्जितम् ॥४०॥
ततः स्नातानुलिप्तश्च शुक्लवासाः शुचिस्मितः ।
सोष्णीशोऽलङ्कृतो राजा मण्डप प्रत्यनीयत ॥४२॥
तत्र वेदीस्थितासन्दीमास्तीर्णां व्याघ्रचर्मणा ।
साम्राज्याय च भौज्याय स्वराज्याय तथैव च ॥
वैराज्यपारमेष्ठायाय राज्याय च तथा खलु ॥
महाराज्याधिपत्याय पूर्वं दक्षिणजानुना ।
वामेन जानुना पश्चादारुरोह शिवप्रभुः ॥४३॥
ततः स प्रार्थयामास पुरोधोभ्यो नराधिपः ।
राज्याभिषेकविधये धर्मराज्यप्रवर्तकः ॥४४॥

० (प्राच्यां मामभिषिञ्चन्तु वसवस्तेजसे श्रिये ।
० याम्यायामभिषिञ्चन्तु मां रुद्रा विजयाय च ॥

Scanned by CamScanner

० आदित्या अभिषिञ्चन्तु प्रतीच्यां दिशि वृद्धये ।
० विश्वेदेवास्तथोदीच्यामभिषिञ्चन्तु पुष्टये ॥
० दिगीशास्त्वभिषिञ्चन्तु मां सदा विजयाय च ॥)

प्रत्यङ्मुखौ ततः प्राच्यां सांवत्सरपुरोहितौ ।
समन्त्रमभ्यसिञ्चेतामौदुम्बर्या प्रशाखया ॥४५॥
उदङ्मुखौ तयाऽवाच्यां शाखया सपलाशया ।
पुनरप्यभ्यसिञ्चेतां शिवं देवेन्द्रसन्निभम् ॥४६॥
जाताभिषेको राजाऽसौ तां प्रशाखामुदग्रगाम् ।
चरणाभ्यां मनाक् स्पृष्ट्वाऽऽसन्दीतोऽवरुरोह च ॥४७॥
तूर्यमङ्गलघोषेण निर्गत्य सपुरोहितः ।
महाभिषेकशालायां सिंहासनमधिष्ठितः ॥४८॥
तदानीं ब्राह्मणामात्यो हस्ते गृह्णन् जनेश्वरम् ।
पपाठोच्चैस्स्वरं मन्त्रं पावनं तैत्तिरीयकम् ॥४९॥

० (महते क्षत्राय महते आधिपत्याय महते जानराज्यायैष वो भरता
० राजा सोमोऽस्माकं ब्राह्मणानां राजा)

ब्राह्मणो घृतपूर्णेन क्षत्रियः क्षीरधारिणा ।
वैश्यो दधिप्रपूर्णेन शूद्रो जलभृतेन च ॥५०॥
हैमेन राजतेनाथ ताम्रेण मृन्मयेन च ।
अभ्यसिञ्चन् प्रसन्नास्यममात्याः क्रमशः शिवम् ॥
छन्दोगो मधुकुम्भेनाचार्यः कुशजलेन च ।
कुम्भैरन्यैस्तथैववान्येऽप्यभ्यसिञ्चंस्तदा शिवम् ॥५२॥
अष्टौ कुमारिकास्तद्वन्नार्यः ससुतभर्तृकाः ।
गन्धोदकेन नीराज्याभ्यसिञ्चन् सर्वगन्धकैः ॥५३॥
ततः कश्चन राजन्यः पूतशंखोदकेन च ।
विधेः समाप्तये चक्रेऽन्तिमं राजाभिषेचनम् ॥५४॥
जगर्जुरुच्चकैः सर्वे तदा लोका जयध्वनिम् ।
उज्जगुर्बन्दिनो भक्त्या शिवस्तोत्राण्यनेकशः ॥५५॥
सङ्गीतज्ञा औत्तराहा दाक्षिणात्याश्च केचन ।
स्वरैः सम्प्रकटीचक्रुर्नानारागरसांस्तदा ॥५६॥
सकृदेवाभ्यवाद्यन्त पणवानकगोमुखाः ।
भेरी-वीणा-काहलाश्च मड्डु-डिंडिम-झर्झराः ॥५७॥
दैवज्ञा ऋत्विजः सर्वे वेदविज्ञाः पुरोधसः ।
आशीर्मन्त्रैरभ्यसिञ्चन् विश्ववन्द्यं शिवप्रभुम् ॥५८॥

Scanned by CamScanner

विलीनघृतपूर्णे च कांस्यपात्रे सदर्पणे ।
प्रीतेन मनसाऽपश्यत् तदा राजा निजाननम् ॥५९॥
तत् पात्रं दर्पणश्चासौ दक्षिणा चापि भूयसी ।
प्रददे विप्रवर्याय नितान्तपरितुष्टये ॥ ॥६०॥
गृष्टयः शतशः पुष्टाः स्वर्णशृङ्गसुशोभिताः ।
मनोज्ञकिङ्किणीमाला ब्राह्मणेभ्यः सर्मर्पिताः ॥६१॥
आनुवंशिकभुक्त्यर्थं भूहीनेभ्यः सर्मर्पिताः ।
प्रभूतधान्यशालिन्य उर्वराः क्षेत्रभूमयः ॥६२॥
कौषेयाणि तथौर्णानि महावस्त्राण्यनेकशः ।
दत्तानि चित्रवर्णानि स्वर्णचित्राङ्कितानि च ॥६३॥
शर्कराखण्डखाद्यानि सुस्वादूनि फलानि च ।
प्रह्लादितेभ्यो बालेभ्यो वितीर्णान्युपभुक्तये ॥६४॥
युवभ्यो दीप्तवीर्येभ्यः प्रस्फुरन्तस्तुरङ्गमाः ।
खड्गा भल्लाः शरास्तीव्राः प्रादीयन्त सहस्रशः ॥६५॥
वैणिकेभ्यो महावीणा नृत्यद्भ्यो नूपुराणि च ।
मृदङ्गा ध्वनिगम्भीरा मार्दङ्गिकगणाय च ॥६६॥
सकुङ्कुमकरण्डानि पत्रोर्णानि सहस्रशः ।
सुवासिनीभ्यो दत्तानि शश्वन्मङ्गलकाम्यया ॥६७॥
कङ्कणानि स्फाटिकानि विलोलत्कुण्डलानि च ।
शुचिस्मिताभ्योऽदीयन्त कुमारीभ्यः सहस्रशः ॥६८॥
कृषकेभ्यो लाङ्गलानि सपुष्टवृषभाणि च ।
वणिग्भ्यश्च तुलादण्डा वन्येभ्यः कम्बलानि च ॥६९॥
रुद्राक्षमालाः साधुभ्यः सकमण्डलु-दण्डकाः ।
द्वीपिव्याघ्रादिचर्माणि काषायवसनानि च ॥७०॥
ध्वजाः काषायकौशेयाः सौवर्णाः कलशा नवाः ।
मन्दिरेषु पवित्रेषु सर्वत्रैव प्ररोपिताः ॥७१॥
इत्थं प्रदानममितं नृपतिः शिवाजिः
सार्वत्रिकं विहितवानभिषेककाले
चिन्तामणिर्यदवलोक्य सचिन्त आसीत्
कल्पद्रुमश्च बत सोऽपि विकल्पमूढः ॥७२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये ‘ राज्याभिषेकारम्भो ’ नाम ६७ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

॥ श्रीशिवराज्योदये महाकाव्ये ६८ तमः सर्गः ॥

राज्याभिषेकः ।

इत्थं प्रदानैरमितैस्तोषयन् सकलाः प्रजाः ।
राजा मण्डपमायातो हृद्यालङ्कारमण्डितः ॥१॥
ततश्च गागाभट्टेन वसिष्ठेनेव राघवः ।
उपस्यन्दनमानीतः शिवाजिः पुरुषोत्तमः ॥२॥
प्रत्यश्वं प्रतिचक्रं च मन्त्रानुद्घोष्य वैदिकान् ।
प्रतिमुच्य ध्वजं भव्यं छत्रमस्थापद् द्विजः ॥३॥
श्रुतिमन्त्रपवित्रं तं रथं देवालयोपमम् ।
नरदेवः स दिव्यौजा आरुरोह द्विजार्थितः ॥४॥
ततो रथाधिरूढेन ते स्यन्दनधुरन्धराः ।
तुरङ्गमा द्विजेन्द्रेण ताडिताः कशया मनाक् ॥५॥
कशास्पर्शवशात् क्षिप्रं धावतस्तांस्तुरङ्गमान् ।
विप्रोऽभ्यमन्त्रयन्मन्त्रैः पावनैस्तैत्तिरीयकैः ॥६॥
तत आदाय वज्राभं धनुर्मन्त्रपवित्रितम् ।
शिवश्चिक्षेप धानुष्को दूरलक्ष्यभिदः शरान् ॥
ततः प्रदक्षिणीकृत्य मण्डपं तमनुत्तमम् ।
बैल्वं लक्ष्यं स विव्याध धन्वी सप्तदशेषुभिः ॥८॥
क्षिप्रं ततः परावर्त्याभिमन्त्रित-तुरङ्गमम् ।
हुत्वा चाज्यं ददौ राजा ब्राह्मणाय रथोत्तमम् ॥९॥
प्रविश्य मण्डपं पुण्यवेदीसंस्थो महीपतिः
अक्षैः क्षत्रियवर्येण किञ्चिच्चिक्रीड केनचित् ॥१०॥
स्वर्णासने हि रत्नाढ्ये नरेन्द्रः शुशुभे तदा ।
रत्नसानौ सुवर्णाद्रौ सुरेन्द्र इव विक्रमी ॥११॥
ततः सुमङ्गलान् घोषान् पिबन् मुदितमानसः ।
विश्रान्तये गतो राजा शयनागारमात्मनः ॥१२॥
अथो समुदितप्राये पूर्वस्यां गरुडाग्रजे ।
शिवः सभालयं प्राप्तो गरुडध्वजसन्निभः ॥१३॥
तस्मिन्नुन्नतवेदीस्थे मण्डपे रत्नमण्डिते ।
प्रफुल्लपद्ममालाभिर्गन्धाढ्याभिरलङ्कृते ॥१४॥
महामाणिक्यविद्योति-स्फुरद्दीपालि-शोभिते ।
चन्दनागरुधूपेन नितान्तमभिगन्धिते ॥१५॥

Scanned by CamScanner

अश्वपुच्छ-बृहन्मत्स्य-तुलाकोटी-विराजिते ।
सभ्यर्देशान्तरायातैः साश्चर्यमवलोकिते ॥१६॥

वृष-मार्जार-मातङ्ग-सिंहव्याघ्र-खगास्तृतम् ।
स्वर्णसिंहासनं पुण्यं चक्रवर्तिनृपोचितम् ॥१७॥

इन्द्रानिल-यमार्काग्नि-वरुणेन्दु-कुबेरभः ।
भरतार्जुन-मान्धातृ-ययाति-नहुषोपमः ॥
भगीरथ-हरिश्चन्द्र-राम-कृष्ण गुणोज्ज्वलः ॥१८॥

चन्द्रगुप्त-यशोधर्म-विक्रमादित्य-विक्रमः ।
समुद्रगुप्त-श्रीहर्ष-शालिवाहनसन्निभः ॥१९॥

महासागरगम्भीरो महामेरुसुनिश्चलः ।
महाविष्णुस्फुरद्वीर्यो महारुद्रप्रतापवान् ॥२०॥

महाराजाधिराजानां विश्वेषां विश्ववर्तिनाम् ।
पूजनीयाङ्घ्रिकमलः कोऽप्यसौ पुरुषोत्तमः ॥२१॥

गुरुदेव-समर्थ-श्रीरामदास-प्रशंसितः ।
अपदस्पर्शमध्यास्त पुण्यश्लोकः शिवप्रभुः ॥२२॥

तदानीं मङ्गलोद्घोषैर्नादिते राजमन्दिरे ।
बबन्ध पट्टं भट्टोऽसावुत्तमाङ्गे शिवप्रभोः ॥२३॥

अमात्यान् नैगमान् पौरान् पण्डितान् वणिजस्तथा ।
लोकानन्यान् प्रतीहारः प्रादर्शयदमुं नृपम् ॥२४॥

ततोऽघोषयतामुच्चैः सांवत्सरपुरोहितौ ।
प्रह्लादयितुमत्यन्तं सभालयगतान् जनान् ॥२५॥

अधर्मध्वान्तसंहर्ता सद्धर्मोद्द्योतकारकः ।
साधूनां संपरित्राता दुष्कृतां च विनाशकः ॥२६॥

क्षात्रवंशावतंसो गो-ब्राह्मणप्रतिपालकः ।
पुत्रः शहाजिराजस्य नप्ता मालोजिवर्मणः ।
राजर्षिः शिववर्माऽयमभिषिक्तोऽधुनेति च ॥२७॥

ततोऽमात्यादयः सर्वेऽप्यमन्दानन्दतुन्दिलाः ।
शिवमभ्यर्चयांचक्रुः भावपूर्णैरुपायनैः ॥२८॥

राजाऽपि सुप्रसन्नास्यः सुहृदां प्रीत्युपायनैः ।
सर्वान् सन्तोषयामास प्रभूतैः प्रत्युपायनैः ॥२९॥

धनुः सशरमादाय ततस्तेन महीभुजा ।
सकृत् प्रदक्षिणीचक्रे मण्डपः स सुशोभनः ॥३०॥

Scanned by CamScanner

ततो नत्वा गुरुं, धेनुं सवत्सां प्रतिपूज्य च ।
सुपूजितं वाजिरत्नमारुरोह क्षणं नृपः ॥३१॥

तथाधिरूढ आगत्य गजराजमलङ्कृतम् ।
विधिवत् पूजयामास शिवस्तं सपुरोहितः ॥३२॥

गजराजं तमारुह्य नानालङ्कारमण्डितम् ।
नगरं परितोऽभ्राम्यत् कंचित् कालं प्रदक्षिणम् ॥३३॥

पथि देवालयान् गत्वा देवांस्तत्र सुपूज्य च ।
निजप्रासादमायातः क्षणं विश्रमितुं शिवः ॥३४॥

एवं सप्तदिनैः श्रुतिस्मृतिपुराणोक्तं विधिं मङ्गलम्
भक्त्यैकान्तिकया समाप्य नितरां तुष्टः शिवो भूपतिः ।
अन्ते साञ्जलिबन्धमानतशिराः प्राह स्मरन्नीश्वरम्
ॐ तत् सत् कृतमेतदस्तु सफलं ब्रह्मार्पणं सर्वथा ॥३५॥

॥ इति श्रीशिवराज्योदये महाकाव्ये 'राज्याभिषेको' नाम ६८ तमः सर्गः समाप्तः ॥

समाप्तमिदं शिवराज्योदयं नाम महाकाव्यं युगादि (वैशाखी) —महोत्सवदिवसे (१३–४–६७ दिनाङ्के) ॥

श्रीशिवराज्योदयम्

ग्रन्थकर्तुः परिचयः

नाम – डॉ. श्रीधर भास्कर वर्णेकर M. A. D. Lit. (नागपुरम्)

जन्म – दि. ३१–७–१९१९

व्यवसायः – नागपुरविद्यापीठे प्रपाठकः

रुचिः – संस्कृत-साहित्य-व्याकरण-वेदान्तेषु

राष्ट्रशक्ति-मराठी साप्ताहिकस्य भूतपूर्वः प्रथमः संपादकः
संस्कृत-भवितव्य-साप्ताहिकस्य " " "
योगप्रकाश-मराठी-मासिकस्य-संपादकः
नागपुरस्थ-भोसला-वेदशास्त्र-महाविद्यालयस्य अध्यक्षः
नागपुरस्थ-योगाभ्यासि-मण्डलस्य अध्यक्षः

प्रकाशनानि

१. मन्दोर्मिमाला (स्फुटकाव्यचतुःशती)
२. महाभारतकथाः
३. भारतरत्नशतकम्
४. स्वातन्त्र्यवीरशतकम्
५. कालिदासरहस्यम् (शतकम्)
६. रामकृष्णपरमहंसीयम् (शतकम्)
७. वात्सल्यरसायनम् (शतकम्)
८. अर्वाचीन-संस्कृत-साहित्य (डी.लिट्.प्रबन्धः)
९. अभंगधर्मपद (धम्मपदस्य मराठी-पद्यात्मकं विवरणम्)
१०. शिवराज्योदयम्-महाकाव्यम् ।
११. विवेकानन्दविजयम्-महानाटकम् ।
(बहुषु नियतकालिकेषु प्रकाशिताः द्विशताधिकाः निबन्धलेखाः अन्ये च नैके शोधप्रबन्धाः)

अप्रकाशितम्

१. परोक्षपाणिनीयम् (हिन्दी-प्रबन्धः)
२. शिवराज्याभिषेकम् (नाटकम्)

Scanned by CamScanner